

अथ विवाहपद्धतिप्रारंभः ॥

किंमत ५ आणे.


रुद्रकलश
माता
पिताजी.
वैद्य
जानी
आचार्य
स्तंभ
स्त्रिया


इस चक्रके कोणामें संक्रांतछे. सो जिस संक्रांतमैं साचो होयजी कुणमें
षुंटी पेली रोवणी इति खात निर्णयः
क. वृ. मी.
पाषाण
जोशी षुंटी
रोवे है.
ई.
पूर्व.
अ.
दक्षिण.
सिं. क. तु.
उत्तर.
नै.
वा.
प.
कुं. मी. मे.
वृ. ध. म.
स्वाहा.
अग्निदेव
स्वधा.

प्रस्तावना.

अथेदं विदितमेव विदुषां यत् सर्वाश्रमोपजीवको गृहस्थाश्रम इति । सच निर्दोषाया असमानार्षगोत्रजायाः कन्याया वैधादुपयमनात्संभवति । वैधंहि कर्माभ्युदयकारि भवति । विधिश्च वेदादिसमधिगम्यः ॥ अतएव इयं "विवाह-पद्धतिः" सूत्रक्रमानुसारेण रचिता ॥ अस्यां वैवाहिकं कर्म समग्रं विद्यते इति ॥

श्री[illegible]यनमः ॥ आचम्य ॥ प्राणानायम्य ॥ श्रीमन्महागणाधिपतयेनमः ॥ श्रीलक्ष्मीनारायणाभ्यांनमः ॥ उमामहेश्वराभ्यांनमः ॥ शचीपुरंदराभ्यांनमः॥इष्टदेवताभ्योनमः ॥ कुलदेवताभ्योनमः ॥ ग्रामदेवताभ्योनमः ॥ स्थानदेवताभ्योनमः ॥ वास्तुदेवताभ्योनमः ॥ सर्वेभ्योदेवेभ्योनमः ॥ सर्वेभ्योब्राह्मणेभ्योनमोनमः ॥ सुमुखश्चैकदंतश्चकपिलोगजकर्णकः ॥ लंबोदरश्चविकटोविघ्ननाशोविनायकः ॥ १ ॥ धूम्रकेतुर्गणाध्यक्षोभालचंद्रोगजाननः ॥ द्वादशैतानिनामानियःपठेच्छृणुयादपि ॥ २ ॥ विद्यारंभेविवाहेचप्रवेशेनिर्गमेतथा ॥ संग्रामेसंकटेचैवविघ्नस्तस्यनजायते ॥ ३ ॥ अविघ्नंकुरुमेदेवसर्वकार्येषुसर्वदा ॥ यात्रामंगलसिद्ध्यर्थमेकदंतनमोऽस्तुते ॥ ४ ॥ शुक्लांबरधरंदेवंशशिवर्णंचतुर्भुजम् ॥ प्रसन्नवदनंध्यायेत्सर्वविघ्नोपशांतये ॥ ५ ॥ अभीप्सितार्थसिद्ध्यर्थंपूजितोयःसुरासुरैः ॥ सर्वविघ्नहरस्तस्मैगणाधिपतयेनमः ॥ ६ ॥ सर्वमंगलमांगल्येशिवेस

र्वार्थसाधिके ॥ शरण्येत्र्यंबकेगौरिनारायणिनमोऽस्तुते ॥ ७ ॥ सर्वदासर्वकार्ये संकल्प
षुनास्तितेषाममंगलम् ॥ येषांहृदिस्थोभगवान्मंगलायतनंहरिः ॥ ८ ॥ तदेवल 6
ग्नंसुदिनंतदेवताराबलंचंद्रबलंतदेव ॥ विद्याबलंदैवबलंतदेवलक्ष्मीपतेतेंऽघ्रियु
गंस्मरामि ॥ ९ ॥ यत्रयोगेश्वरःकृष्णोयत्रपार्थोधनुर्धरः ॥ तत्रश्रीर्विजयोभूतिर्ध्रु
वानीतिर्मतिर्मम ॥ १० ॥ सर्वेष्वारब्धकार्येषुत्रयस्त्रिभुवनेश्वराः देवादिशंतुनः
सिद्धिंब्रह्मेशानजनार्दनाः ॥ ११ ॥ ॐ अद्यश्रीब्रह्मणोद्वितीयेपरार्धेतदादौश्रीश्वे
तवाराहकल्पेसप्तमेवैवस्वतमन्वंतरेअष्टाविंशतितमेकलियुगेकलिप्रथमचरणे जं
बुद्वीपेभरतखंडे आर्यावर्तांतर्गतब्रह्मावर्तैकदेशे कुमारिकानामविष्णुप्रजापतिक्षे
त्रेमहानद्योःश्रीगंगायमुनयोः पश्चिमेतटे नर्मदायाउत्तरेतटे बौद्धावतारे अमुकसं ॥ १ ॥
वत्सरेऽमुकशकेऽमुकायनगतेश्रीसूर्ये अमुकऋतौमहामंगलप्रदमासानामुत्तमे
मासे अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनामनक्षत्रे अमुकरा

शिस्थितेचंद्रे अमुकराशिस्थितेसूर्येअमुकदेवगुर्वादिशेषेषुग्रहेषुयथास्थानस्थिते
षु एवंग्रहगुणविशिष्टायांतिथौममास्याः कन्याया अद्यकरिष्यमाणविवाहांगभूतं
जातकर्मनामकर्मसूर्यावलोकननिष्क्रमणोपवेशनान्नप्राशनचूडांतानांस्वस्वकाले
संस्कारकर्मप्रमादात्प्रतिसंस्कारलोपेयथाशक्त्याप्रायश्चित्तमहंकरिष्ये ॥ पश्चात्
विवाहकर्मप्रारंभनिमित्तं श्रीगणेशांबिकयोः प्रसादसिद्ध्यर्थमभीप्सितकामनासि
द्ध्यर्थं गणपतिपूजनं स्वस्तिपुण्याहवाचनं मातृकास्थापनंपूजनं नांदीश्राद्धंचकरि
ष्ये ॥१॥ अथगणेशावाहनं॥विनायकंमहापुण्यंसर्वविघ्नविनाशनं॥लंबोदरंत्रिनेत्रं
चगणेशमाह्वयाम्यहम्॥ओँगणानांत्वागणपतिꣳहवामहे प्रियाणांत्वाप्रियपतिꣳ
हवामहेनिधीनांत्वानिधिपतिꣳहवामहेवसोमम ॥ आहमजानिगर्भधमात्वमजा
सिगर्भधम् ॥ १ ॥ ओँविश्वानिदेवसवितर्दुरितानिपरासुव ॥ यद्भद्रंतन्नआसुव ॥
ओँ स्वस्तिनइन्द्रोवृद्धश्रवाꣳस्वस्तिनःपूषाविश्ववेदाꣳ ॥ स्वस्तिनस्तार्क्ष्योअरि

ष्टनेमिꣳ स्वस्तिनोबृहस्पतिर्दधातु ॥ दीर्घायुत्वायबलायवर्चसेसुप्रजास्त्वाय सह
स्त्रायुरथोजीवशरदःशतम् ॥ द्यौꣳशांतिरंतरिक्षꣳशांतिः पृथिवीशांतिरापꣳशा
न्तिरोषधयꣳशान्तिः ॥वनस्पतयꣳ शांतिर्विश्वेदेवाꣳशान्तिर्ब्रह्मशान्तिꣳ सर्वꣳ
शान्तिꣳ शान्तिरेवशान्तिꣳसामाशान्तिरेधि ॥ अथातःसंप्रवक्ष्यामिगणयागंसु
खावहम् ॥ कामुकेवासवेयज्ञेविवाहेव्रतबंधके ॥ १ ॥ आदौगणेश्वरंपूज्यसर्वका
मफलप्रदम् ॥ मासिमासाधिपंदेवंगाणपत्यंलभेन्नरः ॥ २ ॥ येनासौपूजितोयज्ञे
मासाचार्यः प्रपूजितः ॥ कोऽसौमासपतिर्देवोह्यत्रधूपेनधूपितः ॥ ३ ॥ ज्येष्ठमासे
कृतंपूज्यंयज्ञकालेसनातनम् ॥ मंडलंप्रथमंपूज्यंकोष्ठद्वादशमुत्तमम् ॥ ४ ॥ सिंदू
रेणार्चितोदेवईशानेतुविनायकः ॥ ग्रहयुक्तंततःस्थाप्यंमासेमासेऽधिकंफलम्
॥ ५ ॥ गणाधिपंमार्गशीर्षेतथापौषेविनायकम् ॥ गजवक्त्रंचमाघेचभालचंद्रंचफा
ल्गुने ॥ ६ ॥ चैत्रमासेतुवेदांगंवैशाखेशिवसूनुकम् ॥ ज्येष्ठेशिवसुतंपूज्यंआषाढे

हरनंदनम् ॥ ७ ॥ श्रावणेतापसंदेवंभाद्रेवैमोदकप्रियम् ॥ आश्विनेचमहावीर्यंम
हावीर्यंचकार्तिके ॥ ८ ॥ विघ्नहर्तारमधिकेमासिपूज्यंगणेश्वरम् ॥ गंधपुष्पैस्तथा
धूपैःकर्पूरैरक्तचंदनैः ॥ ९ ॥ कस्तूरीकुंकुमैः शुभ्रैः सिंदूरेणविशेषतः ॥ रक्तोत्पल
दलैःपूज्योबिल्वपत्रेणकेसरैः ॥ १० ॥ मालतीकेतकीपुष्पैर्हेमपुष्पैर्विचक्षणः ॥
अर्घ्यंधूपंचदीपंचरक्तवस्त्रेणछादनम् ॥ ११ ॥ पूजायांगणनाथस्यदद्यान्मोदक
भोजनम् ॥ नमोदेवगणेशायनमस्तेविघ्ननाशन ॥ १२ ॥ नमस्तेमूषकारूढशुभ
कारायवैनमः ॥ नमः कात्यायनीपुत्रलंबकर्णायवैनमः ॥ १३ ॥ एकदंतविरूपा
त्मन् विद्यावृद्धिविचक्षण ॥ देहिमेपुत्रसौभाग्यंदेहिमेसुखसंपदम् ॥ १४ ॥ शत्र
वश्चैवयेदुष्टादुर्जनाश्चैवयेखिलाः ॥ तेषांप्रशमनंशीघ्रंत्वंविधेहिगणेश्वर ॥ १५ ॥
पूर्वंपूजागणेशस्यशांतिश्चैवविशेषतः ॥ नाशयेत्सर्वदुष्टानिकल्याणंचभवेत्सदा
॥ १६ ॥ कृष्णेनभाषितंपूर्वंदेवतादौचपूजनम् ॥ मंडलंयवयज्ञेनपूज्यस्तत्रविना

यकः ॥ १७ ॥ गणयागविहीनंयन्निष्फलंतद्द्विजायते ॥ तस्माद्गणपतेःपूजाएव मेवप्रकीर्तिता ॥ १८ ॥ हरतेसर्वविघ्नानित्वत्प्रसादात्विनायक ॥ आयुःकर्ता शांतिकर्तावरदोभवपूजितः ॥ १९ ॥ अद्यमयाकृतेनानेनश्रीगणपतिः प्रीय ताम् ॥ इतिगणयागः समाप्तः ॥ अथसुमुहूर्तः ॥ ॐ सुमुहूर्तोऽस्तुतथास्तु ॥ ॐ विश्वानिदेवसवितर्दुरितानिपरासुव ॥ यद्भद्रंतन्नआसुव ॥स्वस्तिनइंद्रोवृद्धश्रवाः स्वस्तिनःपूषाविश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योअरिष्टनेमिः स्वस्तिनोबृहस्पति र्दधातु ॥ दीर्घायुत्वायबलायवर्चसेसुप्रजास्त्वायसहसाऽअथोजीवशरदःशतं ॥ द्यौःशांतिरंतरिक्षं शांतिःपृथिवीशांतिरापःशांतिरोषधयःशांतिः ॥ वनस्पत यः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिःसर्वं शांतिः शान्तिरेवशान्तिःसामा शांतिरेधि ॥ इतिसुमुहूर्तःसमाप्तः ॥ अथपूजनंआवाहनंसमर्पयामि ॥ श्रीम हागणाधिपतयेनमः ॥ आगच्छजगतामीशसुरासुरसुपूजित ॥ अनाथनाथसर्व

ज्ञगणाधिपनमोऽस्तुते ॥ स्वर्णसिंहासनंदिव्यंनानारत्नैश्चमंडितम् ॥ हेरंबंपूजयि
ष्यामिआसनं प्रतिगृह्यताम् ॥ श्री०म०ग० ॥ आसनंसमर्पयामि ॥ २ ॥ गौरी
सुतनमस्तेऽस्तुशंकरप्रियपुत्रक॥पाद्यंगृहाणदेवेशरत्नवैडूर्यकैःसह ॥श्री०म०ग०
पाद्यंसमर्पयामि ॥ ३ ॥ गंगाजलंसमानीतंसुवर्णकलशेस्थितम् ॥ गृहाणार्घ्यम
यादत्तंसर्वविघ्नहरोभव ॥ श्री०म०ग० अर्घ्यंसमर्पयामि ॥४॥ गंगासरस्वतीरेवाप
योष्णीनर्मदाजलैः ॥ आचम्यतांगृहाणेदंभगवन्भक्तवत्सल ॥ श्री०म०ग०आ
चमनीयंसमर्पयामि ॥ ५ ॥ ॐ वरुणस्योत्तंभनमसिवरुणस्यस्कंभसर्जनीस्थोवरु
णस्यऋतसदन्यसि वरुणस्यऋतसदनमसिवरुणस्यऋतसदनमासीद ॥ श्री०म०
ग० स्नानंसमर्पयामि ॥ ६ ॥ रक्तवस्त्रद्वयंदेवमयासंपादितंशुभम् ॥ गृहाणेश्वरस
र्वज्ञसर्वप्रदनमोऽस्तुते ॥श्री०म०ग०॥ वस्त्रंसमर्पयामि ॥७॥ गंधद्वारांदुराधर्षानि
त्यपुष्टांकरीषिणीम् ॥ ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियम् ॥ श्री०म०ग० ॥

गंधंसमर्पयामि ॥८॥ माल्यादीनिसुगंधीनिमालत्यादीनिवैप्रभो ॥ मयाहृतानिपू
जार्थंपुष्पाणिप्रतिगृह्यताम् ॥ श्री० म० ग० ॥ पुष्पंसमर्पयामि॥ॐधूरसिधूर्वधूर्वंतं
धूर्वतंय्योऽस्मान्धूर्वतितंधूर्वयंवयंधूर्वामः ॥ देवानामसिवह्नितमःसस्नितमंपप्रि
तमंजुष्टतमंदेवहूतमम् ॥ श्री० म० ग० ॥ धूपंसमर्पयामि ॥१०॥ अग्निर्ज्योतिर्ज्योतिर
ग्निःस्वाहासूर्योज्योतिर्ज्योतिःसूर्यःस्वाहा ॥ अग्निर्वर्चोज्योतिर्वर्चःस्वाहा सूर्योव
र्चोज्योतिर्वर्चःस्वाहा ॥ ज्योतिःसूर्यःसूर्योज्योतिःस्वाहा ॥ श्री० म० ग० ॥ दीपं
समर्पयामि ॥ ११ ॥ नाभ्याआसीदंतरिक्षःशीर्ष्णोद्यौःसमवर्तत ॥ पद्भ्यांभूमिर्दि
शःश्रोत्रात्तथालोकाँऽअंकल्पयन् ॥ श्री० म० ग० ॥ नैवेद्यंसमर्पयामि ॥ १२ ॥
शीतलंनिर्मलंतोयंकर्पूरेणसुवासितम् ॥ आचम्यतांसुरश्रेष्ठमयादत्तंचभक्तितः ॥
श्री० म० ग० ॥ आचमनीयंसमर्पयामि ॥ १३ ॥ नागवल्लीदलंचैवपूगीफलसम
न्वितम् ॥ कर्पूरेणसमायुक्तंतांबूलंप्रतिगृह्यताम् ॥ श्री० म० ग० ॥ तांबूलंसमर्पया

मि ॥१४॥ याः फलिनीर्याअफलाअपुष्पायाश्चपुष्पिणीः ॥ बृहस्पतिप्रसूतास्ता
नोमुंचंत्वꣳहसः श्री०म०ग० ॥ पूगीफलंसमर्पयामि ॥ १५ ॥ हिरण्यगर्भः
समवर्तताग्रेभूतस्यजातःपतिरेकआसीत् ॥ सदाधारपृथिवींद्यामुतेमांकस्मैदेवा
यहविषाविधेम श्री०म०ग० ॥ दक्षिणांसमर्पयामि ॥ नीराजनं । पुष्पांजलिंस० ।
विघ्नेश्वरायवरदायसुरप्रियायलंबोदरायसकलायजगद्धिताय ॥ नागाननायश्रुति
यज्ञविभूषितायगौरीसुतायगणनाथनमोनमस्ते इतिप्रार्थना ॥ श्रीगणेशदेवताप्र
सादसिद्ध्यर्थंसर्वविधेः परिपूर्णतास्तु ॥ हस्तेजलमादायकृतेनानेनपूजनेनश्रीगण
पतिःप्रीयताम् ॥ अथकलशप्रतिष्ठा ॥ ततईशानकोणेअव्रणंकलशमक्षतंविभू
षितंसंस्थाप्य ॥ भूमिस्पर्शनमंत्रः ॥ भूरसिभूमिरस्यदितिरसिविश्वधाया विश्व
स्यभुवनस्यधर्त्री ॥ पृथिवींयच्छपृथिवींदृꣳहपृथिवींमाहिꣳसीः ॥ १ ॥ धान्यम
सीतिधान्यं ॥ धान्यमसिधिनुहिदेवान्प्राणायत्वोदानायत्वाव्यानायत्वा ॥ दीर्घा

वि. प.

॥ ५ ॥

क. प्रति.

मनुप्रसितिमायुषेधांदेवोवं÷सविताहिरण्यपाणिःप्रतिगृह्णात्वच्छिद्रेणपाणिनाच
क्षुंषेत्वमहीनांपयोसि ॥ २ ॥ तस्योपरिकलशंस्थापयेत् ॥ कलशेदूर्वाक्षतपूगीफ
लादिनिक्षिपेत् ॥ तत्रमंत्राः ॥ आजिघ्रकलशंमह्यात्वाविशंत्विंदवः ॥ पुनरूर्जा
निवर्तस्वसानं÷सहस्रंधुक्ष्वोरुधारापयस्वतीपुनर्माविशताद्रयिऽ ॥ ॐवरुणस्ये
त्युदकंनिक्षिपेत् । ॐवरुणस्योत्तंभनमसिवरुणस्यस्कंभसर्जनीस्थोवरुणस्यऋत
सदन्यसिवरुणस्यऋतसदनमसिवरुणस्यऋतसदनमसिवरुणस्यऋतसदनमा
सीद । वसोःपवित्रेतिवस्त्रंकंठेवेष्टयेत् ॥ ॐवसोःपवित्रमसिशतधारंवसोःपवित्र
मसिसहस्रधारम् ॥ देवस्त्वासवितापुनातुवसोः पवित्रेणशतधारेणसुप्वाकाम ॥ ५ ॥
धुक्षः ॥ याःफलिनीरितिपूगीफलम् ॥ ॐयाःफलिनीर्याऽअफलाऽअपुष्पायाश्चपु
ष्पिणीः ॥ बृहस्पतिप्रसूतास्तानोमुंचन्त्वंहसः ॥ परिवाजेतिपंचरत्नानि ॥
ॐपरिवाजपतिः कविरग्निर्हव्यान्यक्रमीत् ॥ दधद्रत्नानिदाशुषे ॥ ॐहिरण्यगर्भऽ

समवर्त्तताग्रेभूतस्यजातऽपतिरेकऽआसीत् ॥ सदाधारपृथिवींद्यामुतेमांकस्मैदेवा
यहविषाविधेम ॥ इतिहिरण्यम् ॥ गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीम् ॥ ईश्वरीं
सर्वभूतानांतामिहोपह्वयेश्रियम् ॥ इतिगंधंक्षिपेत् ॥ याओषधीरितिसर्वौषधीः ॥
याओषधीः पूर्वाजातादेवेभ्यस्त्रियुगंपुरा ॥ मनैनुबभ्रूणामहः शतंधामानिसप्तच ॥
स्योनापृथिवीतिसप्तमृदः । ॐस्योनापृथिवीनोभवानृक्षरानिवेशनी । यच्छानः
शर्मसप्रथाः ॥ कांडात्कांडादितिदूर्वा । ॐकांडात्कांडात्प्ररोहंतीपरुषःपरुषस्परि ।
एवानोदूर्वेप्रतनुसहस्रेणशतेनच । अश्वत्थेवइतिपंचपल्लवान्क्षिपेत् ॥ ॐअश्वत्थे
वोनिषदनम्पर्णेवोवसतिष्कृता ॥ गोभाजइत्किलासथयत्सनवथपूरुषम् ॥ पवित्रे
स्थइतिमंत्रेणपवित्राणिक्षिपेत् ॥ ॐपवित्रेस्थोवैष्णव्यौसवितुर्वः प्रसवऽउ
त्पुनाम्यच्छिद्रेणपवित्रेणसूर्यस्यरश्मिभिः ॥ तस्यतेपवित्रपतेपवित्रपूतस्ययत्
त्कामःपुनेतच्छकेयम् ॥ पूर्णादर्वीतिपूर्णपात्रम् ॥ ॐपूर्णादर्विपरापतसुपूर्णापुन

रापंत ॥ वृस्नेवृविक्रीणावहा॒ऽइषमूर्जं॑ शतक्रतो॥श्रीश्चतेतिश्रीफलम् ॥ ॐश्रीश्चते
लक्ष्मीश्च॒पत्न्यांवहोरा॒त्रेपा॒र्श्वेनक्षत्राणिरू॒पम॒श्विनौ॒व्यात्तम् इ॒ष्णंनिषाणा॒मुम्मंऽ
इषाणसर्व॒लो॒कंमंऽइषाण ॥ ॐमनोजू॒तिर्जुषता॒माज्यस्य॒बृह॒स्पतिर्य॒ज्ञमि॒मंतंनो॒त्व
रिष्टंय॒ज्ञं समि॒मंदधातु ॥ विश्वेदे॒वासइ॒हमादयंता॒मोप्रतिष्ठ ॥ इतिकलशप्रति
ष्ठा ॥ अथातःसंप्रवक्ष्यामिकलशसंभवोयथा ॥ हिमाचलोत्तरेपार्श्वेक्षीरोदेनामसा
गरे ॥ १ ॥ प्रकुर्वन्मथनंतत्रदेवाःसर्वेसवासवाः ॥ दैत्याबलिमुखाश्चैवइंद्राद्याःसुर
नायकाः ॥ २ ॥ समुद्रमथनंकृत्वानेत्रंकृत्वाचवासुकिम् ॥ मूलेचकूर्मंसंस्थाप्यवि
ष्णोर्बाहूचमंदरे ॥ ३ ॥ एकत्रदेवताःसर्वेबलिभिर्दानवैःकृताः ॥ मथ्यमानेतदात
स्मिन्क्षीरोदेसागरोत्तमे ॥ ४ ॥ उत्पन्नानिचरत्नानियानितत्रमहांतिच ॥ विमानं
पूजकश्चैवउत्पन्नंहंसवाहनम् ॥५॥ नागऐरावतश्चैववृक्षोयःपारिजातकः ॥ वेणी
सुवाजिकश्चैवरंभासर्वगुणान्विता ॥ ६ ॥ मणिकौस्तुभरत्नाद्यंबालचंद्रस्तथैवच ॥

कुंडलानिधनुश्चैवगावःपंचशिवास्तथा ॥ ७ ॥ लक्ष्मीःसुरूपासुमनासुशीलासुरभि
स्तथा ॥ तत्रस्थापितेकलशेयस्याजातिश्चवारुणा ॥ ८ ॥ भूमौचआसनंतत्रभा
सयंतंतदातव ॥ सर्जनेविश्वकर्माचकलशेकामरूपके ॥ ९ ॥ कलाकलाहिदेवानां
दानवानांतथैवच ॥ नियतोऽयंपुराकालेकलशश्चैवउच्यते ॥ १० ॥ कलशस्यमु
खेविष्णुःकंठेचवृषभध्वजः ॥ मूलेचसंस्थितोब्रह्मामध्येमातृगणाःस्मृताः ॥ ११ ॥
कुक्षौचसागराःसप्तसप्तद्वीपाचमेदिनी ॥ अर्जुनीगोमतीचैवचंद्रभागासरस्वती
॥ १२ ॥ कावेरीकृष्णावेणीचगंगाचैवमहानदी ॥ तापीगोदावरीचैवनर्मदाचव
हिष्कृता ॥१३॥ मध्यपादाशांतिनंदाप्रलंबस्यैवनिर्गता ॥ प्रभासंपूज्यकंचैवनैमि
षंचहिमालयः ॥ १४ ॥ वटेश्रीमान्निमूर्त्यश्चगंगासागरमेवच ॥ अर्बुदंचहिमार
त्कंमानसंचमहत्सरः ॥ १५ ॥ पृथिव्यांयानितीर्थानितिष्ठंत्यत्रैवसंधिषु ॥ गाय
त्रीसहितोविप्र अत्र पृच्छति एव च ॥ १६ ॥ ऋग्वेदोऽथयजुर्वेदःसामवेदस्तथैव

च ॥ अथर्वणेनसहितःकलशेचसमाश्रितः ॥ १७ ॥ विश्वकर्मन्समागच्छदेवक
र्मसमप्रभो ॥ हस्तेकृत्वायथाकुंभंनिशिदेवांश्चमंडले ॥ १८ ॥ ब्रह्माद्यादेवताः
सर्वामंडलैश्चसुसंयुताः ॥ कुंभेहेममयेचैवरूप्यताम्रमयेऽथवा ॥ १९ ॥ नदो
क्षंसुमुखंचैवपूरयेन्निर्मलैर्जलैः ॥ ईशान्यांदिशिसंस्थाप्यधान्यवस्त्रंसुशोभनम्
॥ २० ॥ सुमुहूर्तेशुभेलग्नेसंयोगेदक्षिणांतके ॥ पुण्याहंघोषशब्देनवरणंचप्रति
ष्ठिते ॥ २१ ॥ यत्पुण्यंकपिलादानेस्वर्णदानेषुयत्फलम् ॥ तत्फलंसमवाप्नोतिकल
शस्येतिकीर्तनात् ॥ २२ ॥ ब्राह्मणोलभतेविद्यांक्षत्रियोलभतेमहीम् ॥ वैश्यश्चल
भतेलाभंशूद्रःसुखमवाप्नुयात् ॥ २३ ॥ वंध्याचलभतेगर्भंपुत्रार्थीपुत्रमुत्तमम् ॥
भार्यार्थीलभतेभार्यांकन्याविंदतिसत्पतिम् ॥ २४ ॥ अनेनोक्तविधानेनब्राह्मणा
र्चानुमंत्रितम् ॥ २५ ॥ कलशस्यैवमंत्रेणयःकुर्यादभिषेचनम् ॥ आयुरारोग्यमै
श्वर्यंलभतेकामनासह ॥ २६ ॥ कलशदेवताभ्योनमः आवाहयामि ॥ आसनं

सम० ॥ पाद्यं० ॥ अर्घ्यं० ॥ आचमनीयं ॥ स्नानं० ॥ वस्त्रं० ॥ गंधं० ॥ अक्ष
तान्० ॥ पुष्पं० ॥ धूपं० ॥ दीपं ॥ नैवेद्यं० ॥ आचम० ॥ तांबूलं० ॥ पूगी० ॥
दक्षिणां० ॥ नम० ॥ श्रीशुभकलशदेवताप्रसन्नतार्थंसर्वेविधेः परिपूर्णतास्तु ॥
अथकलशप्रार्थना ॥ कलशस्यमुखेविष्णुःकंठेरुद्रःसमाश्रितः ॥ मूलेतस्यस्थि
तोब्रह्मामध्येमातृगणाःस्मृताः ॥ १ ॥ कुक्षौतुसागराःसप्तसप्तद्वीपावसुंधरा ॥ ऋ
ग्वेदोऽथजुर्वेदःसामवेदोह्यथर्वणः ॥ २ ॥ अंगैश्चसहिताःसर्वेकलशंतुसमाश्रि
ताः ॥ देवदानवसंवादेमथ्यमानेमहोदधौ ॥ ३ ॥ उत्पन्नोऽसियदाकुंभविधृतोवि
ष्णुनास्वयम् ॥ त्वत्तःसर्वाणितीर्थानिदेवाःसर्वेत्वयिस्थिताः ॥ ४ ॥ त्वयितिष्ठंति
भूतानित्वयिप्राणाःप्रतिष्ठिताः ॥ शिवःस्वयंत्वमेवासिविष्णुस्त्वंचप्रजापतिः
॥ ५ ॥ आदित्यावसवोरुद्राविश्वेदेवाःसपैतृकाः ॥ त्वयितिष्ठंतिसर्वेऽपियतःकाम
फलप्रदाः ॥ ६ ॥ त्वत्प्रसादादिमंयज्ञंकर्तुमीहेजलोद्भव ॥ सांनिध्यंकुरुमेदेवप्रस

न्नोभवसर्वदा ॥७॥ इतिकलशप्रार्थना ॥ अथलोकपालपूजाप्रारंभः ॥ ॐगणानांत्वागणपतिꣳहवामहेप्रियाणांत्वाप्रियपतिꣳहवामहेनिधीनांत्वानिधिपतिꣳहवामहेवसोमम ॥ आहमजानिगर्भधमात्वमजासिगर्भधम् ॥ श्रीगणेशइहागच्छइहतिष्ठ ॥ १ ॥ परमेष्ठिनंसदेवंचअष्टनेत्रंचतुर्मुखम् ॥ गायत्रीसहितंनाथंब्रह्मआवाहयाम्यहम् ॥ ॐब्रह्मयज्ञानंप्रथमंपुरस्ताद्विसीमतꣳसुरुचोवेनआवः ॥ सबुध्न्याउपमाअस्यविष्ठाꣳसतश्चयोनिमसतश्चविवः ॥ ब्रह्मदेवतेइहागच्छइहतिष्ठ ॥ २ ॥ केशवंपुंडरीकाक्षंमाधवंमधुसूदनम् ॥ रुक्मिणीसहितंदेवंविष्णुमावाहयाम्यहम् ॥ विष्णोरराटमसिविष्णोꣳश्नप्त्रेस्थोविष्णोꣳस्यूरसिविष्णोर्ध्रुवोऽसि ॥ वैष्णवमसिविष्णवेत्वा ॥ विष्णोइहागच्छेहतिष्ठ ॥ ३ ॥ शंकरंवृषभारूढंशूलपाणिंत्रिलोचनम् ॥ उमयासहितंदेवंशंभुमावाहयाम्यहम् ॥ ॐ नमःशंभवायचमयोभवायचनमःशंकरायचमयस्करायचनमःशिवायचशिवतरायच ॥

शिवइहागच्छइहतिष्ठ ॥ ४ ॥ रत्नसागरसंभूतशरीरांविष्णुमाश्रिताम् ॥ यजमा
नहितार्थायलक्ष्मीमावाहयाम्यहं ॥ श्रीश्चंतेलक्ष्मीश्चपत्न्यांवहोरात्रेपार्श्वेनक्षत्रा
णिरूपमश्विनौव्यात्तंम् ॥ इष्णन्निषाणामुंमंइषाणसर्वलोकंमंइषाण ॥ लक्ष्मीइहा
गच्छइहतिष्ठ ॥ ५ ॥ सिंहासनेसुसंविष्टांदानवानांविनाशिनीम् ॥ नारायणींश्रियं
दुर्गांदेवीमावाहयाम्यहम् ॥ देव्यैनमःइहागच्छइहतिष्ठ ॥ ६ ॥ सर्वविद्यामुखे
यस्याःसर्वदेवेषुपूजिता ॥ सरस्वतित्वमागच्छपंचनद्येतिपाठनात् ॥ ॐपंचनद्यः
सरस्वतीमपियंतिस्रोतसः ॥ सरस्वतीतुपंचधासोदेशेभवत्सरित् ॥ सरस्वति
इहागच्छइहतिष्ठ ॥ ७ ॥ शांत्यर्थंपूज्यतेनित्यंदेवयज्ञक्रियाश्रितम् ॥ अंबि
कासहितंनित्यंभैरवमाह्वयाम्यहम् ॥ क्षेत्रपालइहागच्छइहतिष्ठ ॥ ८ ॥ ॐत्र्यं
बकंयजामहेसुगंधिंपुष्टिवर्धनम् ॥ उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात् ॥
भोत्र्यंबकदेवइहागच्छइहतिष्ठ ॥ ९ ॥ जयंतीमंगलाकालीभद्रकालीकपालिनी ॥

दुर्गाक्षमाशिवाधात्रीस्वाहास्वधानमोऽस्तुते ॥ कुलदेवतेइहागच्छइहतिष्ठ ॥
॥ १० ॥ ॐअग्निर्देवतावातोदेवतासूर्योदेवताचंद्रमादेवतावसवोदेवतारुद्रादेवता
दित्यादेवतामरुतोदेवताविश्वेदेवादेवताबृहस्पतिर्देवतेंद्रोदेवतावरुणोदेवता ॥ वरु
णइहागच्छइहतिष्ठ ॥ ११ ॥ आवोदेवासईमहेवामंप्रयत्यध्वरे ॥ आवोदेवास
आशिषोयज्ञियासोहवामहे ॥ अग्नेइहागच्छइहतिष्ठ ॥ १२ ॥ श्रीमहालोकपाल
देवताभ्योनमः आवाहयामि ॥ आसनं० ॥ पाद्यं० ॥ अर्घ्यं० ॥ आच० ॥ स्नानं० ॥
वस्त्रं० ॥ गंधं० ॥ अक्षतान् ॥ पुष्पं० ॥ धूपं० ॥ दीपं० ॥ नैवेद्यं० ॥ आचम० ॥
तांबूलं० ॥ पूगीफलं० ॥ दक्षिणां० ॥ नम० ॥ श्रीलोकपालदेवताप्रसन्नता
र्थंसर्वविधेः परिपूर्णतास्तु ॥ अथनवग्रहपूजनम् ॥ दिवाकरंजगन्नाथंब्रह्मणाचा
मराश्रितम् ॥ लोकनाथंजगच्चक्षुंसूर्यमावाहयाम्यहं ॥ १ ॥ ॐआकृष्णेनरजसाव
र्तमानोनिवेशयन्नमृतंमर्त्यंच ॥ हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यं

न् ॥ सूर्यदेवतेअत्रभूमंडलेआगच्छ० ॥ १ ॥ हिमरश्मिंनिशानाथंक्षीरसागरसं
भवम् ॥ औषधीनांतुराजानंसोममावाहयाम्यहम् ॥ ॐइमंदेवाअसपत्नꣳसुव
ध्वंमहतेक्षत्रायमहतेज्यैष्ठ्यायमहतेजानराज्यायेंद्रस्येंद्रियाय ॥ इममसुष्यपुत्रममु
ष्यैपुत्रमस्यैविशऽएषवोमीराजासोमोऽस्माकंब्राह्मणानाꣳराजा ॥ चंद्रमादेवते
अत्रभूमंडलेआगच्छ ॥ २ ॥ रुद्रस्यैवतुसंभूतंलोहितांगंसुवर्चसम् ॥ कुमारंक्रूर
कर्माणंभौममावाहयाम्यहम् ॥ ॐअग्निर्मूर्धादिवःककुत्पतिःपृथिव्याअयम् ॥
अपाꣳरेताꣳसिजिन्वति ॥ भोमंगलदेवअत्रभूमंडलेआगच्छ ॥ ३ ॥ बुद्धिभू
तंप्रदातारंसोमवंशस्यवर्धनम् ॥ यजमानहितार्थायबुधमावाहयाम्यहम् ॥ उद्बु
ध्यस्वाग्नेप्रतिजागृहित्वमिष्टापूर्तेसꣳसृजेथामयंच ॥ अस्मिन्त्सधस्थेअध्युत्तरस्मि
न्विश्वेदेवायजमानश्चसीदत ॥ भोबुधदेवअत्रभूमंडलेआगच्छ ॥ ४ ॥ बुद्धिश्रे
ष्ठंगिरांपुत्रंदेवतानांपुरोहितम् ॥ शक्रस्यमंत्रिणंभक्त्यागुरुमावाहयाम्यहम् ॥

ॐबृहस्पतेअतियदर्योअर्हाद्युमद्विभातिक्रतुमज्जनेषु ॥ यद्दीदयच्छवसऋतप्रजा
ततदस्मासुद्रविणंधेहिचित्रम् ॥ भोबृहस्पतिदेवअत्रभूमंडलेआगच्छ ॥ ५ ॥ प्र
तिष्ठंजठरेशंभोःपुनारक्षतुमत्कृतम् ॥ पुरोहितंसुरारीणांशुक्रमावाहयाम्यहम् ॥
ॐअन्नात्परिस्रुतोरसंब्रह्मणाव्यपिबत्क्षत्रंपयꣳसोमंप्रजापतिः ॥ ऋतेनसत्यमिं
द्रियंविपानꣳशुक्रमंधसऽइन्द्रस्येंद्रियमिदम्पयोमृतंमधु ॥ भोशुक्रदेवअत्रभूमण्ड
लेआगच्छ ॥ ६ ॥ प्रदीप्तवह्निपूताभ्यामभिनीयसमप्रभम् ॥ छायामार्तंडसंभूतं
शनिमावाहयाम्यहम् ॥ ॐशन्नोदेवीरभिष्टयआपोभवंतुपीतये ॥ शंयोरभिस्रवं
तुनꣳ ॥ भोशनिदेवअत्रभूमंडले आगच्छ ॥ ७ ॥ चक्रेणछिन्नमूर्धानंविस्फुरद्र
त्नभूषितम् ॥ सैंहिकेयंमहाकायंराहुमावाहयाम्यहम् ॥ ॐकयानश्चित्रआभुवदू
तीसदावृधꣳसखा ॥ कयाशचिष्ठयावृता ॥ भोराहोअत्रभूमण्डलेआगच्छ ॥ ८ ॥
ब्रह्मण्यकुलसंभूतंसृष्टिलोकभयापहं ॥ शिखिनंतुमहात्मानंकेतुमावाहयाम्यहम् ॥

24

ॐ केतुंकृण्वन्नकेतवेपेशोमर्याऽअपेशसे ॥ समुषद्भिरजायथाः ॥ भोकेतोअत्रभूमंडलेआगच्छ ॥ ९ ॥ ब्रह्मामुरारिस्त्रिपुरांतकारीभानुःशशीभूमिसुतोबुधश्च ॥ गुरुश्चशुक्रःशनिराहुकेतवःसर्वेग्रहाःशांतिकराभवंतु ॥ १० ॥ श्रीमहानवग्रहदेवताभ्योनमःआवाहया० ॥ आसनं समर्पयामि ॥ पाद्यं० ॥ अर्घ्यं० ॥ आचमनीयं० ॥ स्नानं० ॥ वस्त्रं० ॥ गंधं० ॥ अक्षतान्० ॥ पुष्पं० ॥ धूपं० ॥ दीपं० ॥ नैवेद्यं० ॥ आचमनीयं० ॥ तांबूलं० ॥ पूगीफलं० ॥ दक्षिणां० ॥ नमस्कारं० ॥ श्रीनवग्रहदेवताप्रसन्नतार्थंसर्वविधेःपरिपूर्णतास्तु ॥ अथमातृकापूजनं ॥ वसोः पवित्रमसिशतधारंवसोः पवित्रमसिसहस्रधारम् ॥ देवस्त्वांसविता पुनातुवसोः पवित्रेणशतधारेणसुप्वाकामधुक्षः ॥ १ ॥ वसोर्धारांकरिष्यामि ॥ जयंतीमंगलाकालीभद्रकालीकपालिनी ॥ दुर्गाक्षमाशिवाधात्रीस्वाहास्वधानमोऽस्तुते ॥ २ ॥ सर्वमंगलमांगल्येशिवेसर्वार्थसाधिके ॥ शरण्येत्र्यंबकेगौरिनारायणिन

मोऽस्तुते ॥ ३ ॥ याकुंदेंदुतुषारहारधवलायाशुभ्रवस्त्रावृतायावीणावरदंडमंडि
तकरायाश्वेतपद्मासना ॥ याब्रह्माच्युतशंकरप्रभृतिभिर्देवैःसदावंदितासामांपातु
सरस्वतीभगवतीनिःशेषजाड्यापहा ॥ ४ ॥ याश्रीःस्वयंसुकृतिनांभवनेषुलक्ष्मीः
पापात्मनांकृतधियांहृदयेषुबुद्धिः ॥ श्रद्धासतांकुलजनप्रभवस्यलज्जातांत्वांनताः
स्मपरिपालयदेविविश्वम् ॥ ५ ॥ गौरीपद्माशचीमेधासावित्रीविजयाजया ॥
देवसेनास्वधास्वाहामातरोलोकमातरः ॥ ६ ॥ शांतिःपुष्टिश्चतुष्टिश्चकुलदेवीत
थैवच ॥ आयांतुमातरोह्येताममयज्ञेशुभप्रदाः ॥७॥ ब्राह्मीमाहेश्वरीचैवकौमारी
वैष्णवीतथा ॥ वाराहीचतथेंद्राणीचामुंडाःसप्तमातरः ॥ ८ ॥ धृतिःपुष्टिस्तथा
तुष्टिरात्मनःकुलदेवता ॥ गणेशःक्षेत्रपालश्चएताःषोडशमातरः ॥ ९ ॥ षोड
शमातृकादेवीभ्योनमः ॥ आवाहनंसमर्पयामि आसनं० ॥ पाद्यं० ॥ अर्घ्यं० ॥
आचमनीयं० ॥ स्नानं० ॥ वस्त्रं० ॥ गंधं० ॥ अक्षतान्० ॥ पुष्पं० ॥ धूपं० ॥

दीपं० ॥ नैवेद्यं० ॥ आच० ॥ तांबू० ॥ पूगीफ० ॥ दक्षिणां० ॥ नम० श्रीमहा
देव्याःप्रसादात् सर्वविधेः परिपूर्णतास्तु ॥ अथरक्षाविधानम् ॥ ॐ गणाधिपं
नमस्कृत्य नमस्कृत्य पितामहम् ॥ विष्णुं रुद्रं श्रियं देवीं वंदे भक्त्या सरस्वतीम्
॥ १ ॥ स्थानाधिपंनमस्कृत्यदिननाथंनिशाकरम् ॥ धरणीगर्भसंभूतंशशिपुत्रंबृ
हस्पतिम् ॥ २ ॥ दैत्याचार्यंनमस्कृत्यसूर्यपुत्रंमहाग्रहम् ॥ राहुंकेतुंनमस्कृत्यय
ज्ञारंभेविशेषतः ॥ ३ ॥ शक्राद्यादेवताःसर्वान्मुनींश्चकथयाम्यहम् ॥ गर्गंमुनिं
नमस्कृत्यनारदंमुनिसत्तमम् ॥ ४ ॥ वसिष्ठंमुनिशार्दूलंविश्वामित्रंतथैवच ॥
व्यासंमुनिंनमस्कृत्यसर्वशास्त्रविशारदम् ॥ ५ ॥ विद्याधिकायेमुनयआचार्याश्च
तपोधनाः ॥ तान्सर्वान्प्रणमाम्येवयज्ञरक्षाकरान्सदा ॥ ६ ॥ पूर्वेरक्षतुगोविंदआ
ग्नेय्यांगरुडध्वजः ॥ याम्यांरक्षतुवाराहोनारसिंहस्तुनैर्ऋते ॥ ७ ॥ वारुण्यांकेश
वोरक्षेद्वायव्यांमधुसूदनः ॥ उत्तरेश्रीधरोरक्षेदीशानेतुगदाधरः ॥ ८ ॥ ऊर्ध्वं

गोवर्धनोरक्षेदधस्ताच्चत्रिविक्रमः ॥ एवंदशदिशोरक्षेद्वासुदेवोमहाबलः ॥ ९ ॥
शंखोरक्षेच्चयज्ञाग्रेपृष्ठेखड्गस्तथैवच ॥ वामपार्श्वेगदारक्षेद्दक्षिणेतुसुदर्शनः ॥१०॥
ब्राह्मणंमाधवोरक्षेदाचार्यंपातुमाधवः ॥ अच्युतोऽवतुऋग्वेदंयजुर्वेदमधोक्षजः
॥ ११ ॥ कृष्णश्चसामगंरक्षेदाथर्वकंचमाधवः ॥ उपदेष्टातुयोविप्रस्तंरुद्रोऽवतुस
र्वदा ॥ १२ ॥ यजमानंसपत्नीकंकमलाक्षश्चरक्षतु ॥ रक्षाहीनंतुयत्स्थानंतत्सर्वंर
क्षतांहरिः ॥ १३ ॥ वेदमंत्रैश्चकर्तव्यारक्षाशुभ्रैश्चसर्षपैः ॥ आदौजपेद्गणानांत्वा
निरुक्तंजातवेदसम् ॥ १४ ॥ यदत्रसंस्थितंभूतंस्थानमाश्रित्यसर्वदा ॥ स्थानं
त्यक्त्वातुतत्सर्वंयत्रस्थंतत्रगच्छतु ॥ १५ ॥ अपक्रामंतुभूतानिपिशाचाःसर्वतो
दिशम् ॥ सर्वेषामवरोधेनब्रह्मकर्मसमारभे ॥ १६ ॥ इतिरक्षापूर्वादिदिक्षुअक्ष
तादिप्रक्षेपः ॥ इतिरक्षाविधानं ॥ देवताभ्योरक्षासूत्रदानंततोब्राह्मणानांहस्तेर
क्षाबंधनंकर्तव्यम् ॥ तत्रमंत्रः ॥ ॐव्रतेनदीक्षामाप्नोतिदीक्षयाप्नोतिदक्षिणाम् ॥

दक्षिणाश्रद्धामाप्नोतिश्रद्धयासत्यमाप्यते ॥ १ ॥ ततः तिलकमंत्रः ॥ ॐयुंजंति
ब्रध्नमरुषंचरंतंपरितस्थुषः ॥ रोचंतेरोचनादिवि ॥ युंजंत्यस्यकाम्याहरीविपक्ष
सारथे ॥ शोणाधृष्णूनृवाहसा ॥ १ ॥ अथवरंवृणीते ॥ कन्यापितादक्षिणहस्तेर
क्षासूत्रफलदक्षिणाक्षतजलान्यादाय ॥ ॐतत्सदित्यादिपठित्वाअमुकगोत्रोऽमुक
शर्माहं अमुकगोत्रममुकशर्माणंवरंत्वांकन्यादानार्थंवृणे वृतोऽस्मीतिप्रतिवचन
म् ॥ रक्षाबंधनमंत्राः ॥ ॐ यदाबध्नन्दाक्षायणाहिरण्यꣳशतानीकायसुमनस्यमा
नाः ॥ तन्मआबध्नामिशतशारदायायुष्मांजरदष्टिर्यथासम् ॥ १ ॥ येनराजाबलि
र्बद्धोदानवेंद्रोमहाबलः ॥ तेनत्वामनुबध्नामिरक्षेमाचलमाचल ॥ २ ॥ तिलकमं
त्रः ॥ ॐस्वस्तिनइंद्रोवृद्धश्रवाःस्वस्तिनःपूषाविश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योऽ
अरिष्टनेमिः स्वस्तिनोबृहस्पतिर्दधातु ॥ १ ॥ यन्मयाभाषितंपूर्वंकन्यादानवच
स्तथा ॥ इदमर्घ्यमिदंपाद्यमक्षुद्रीकरणायच ॥ १ ॥ उदरेदशमासैश्चपोषितांचा

ष्टवार्षिकीम् ॥ तुभ्यंकन्यांप्रदास्यामिदेवाग्निगुरुसन्निधौ ॥ २ ॥ इतिवरवरणं ॥
अथवरमाह ॥ उपानहमुपमुंचअग्निर्हविरादेयोघृतकुंडंप्रवेष्टातत्रास्थितोवरहो
म्यः दूरेधताद्धिसंभ्रमः तस्माद्वरमाह उपानहमुपमुंचतात् ॥ ॐषडर्घ्याभवंतिआ
चार्यऋत्विग्वैवाह्योराजाप्रियस्नातकः ॥ कोऽयमाचार्यः ॥ वेदांगीब्रह्मचारीचवि
द्वान्वेदविचक्षणः ॥ प्राज्ञोबुद्धिमतांश्रेष्ठोअयमाचार्यउच्यते ॥ १ ॥ कोसौऋत्वि
ग् ॥ ज्ञानीबहुगुणश्चैवचतुर्मुखइवप्रभुः ॥ ललितःशीलसंयुक्तऋत्विगेवंसउच्य
ते ॥ २ ॥ कोऽसौविवाह्यः ॥ रूपवांश्चगुणीज्ञानीविद्यावांश्चमहाबली ॥ मतिमान
तिश्रेष्ठश्चएवंभूतोवरःस्मृतः ॥ ३ ॥ कोराजा ॥ इंद्रइवप्रजापालोरामोदाशरथि
र्यथा ॥ ईदृशोनृपोमान्यस्तस्मैचार्घ्यंप्रदीयते ॥ ४ ॥ काप्रिया ॥ रामस्यचप्रि
यासीताविष्णोर्लक्ष्मीस्तथैवच ॥ ईश्वरस्ययथागौरीप्रियार्घ्याकथितेदृशी ॥ ५ ॥
कोऽसौस्नातकः ॥ सप्तस्नातस्तपःस्नातस्नातश्चनियमादिषु ॥ विद्यास्नातोब्रह्मस्नातः

30

सपूज्यःस्नातकोऽब्रवीत् ॥६॥ इतिप्रतिसंवत्सरमहोरात्रं ज्योतिष्मानृकृतौहिऋता
विज्यः आसनार्हः साधुर्भवआसनेअहंसाधुरितिवरउच्यते॥ कःसाधुः॥सत्यवा
न्शीलसंपन्नोज्ञानवान्दृढवांस्तथा ॥ परदारपरित्यागीससाधुर्वरउच्यते ॥ वरः
कन्याः कथयति॥ दशदोषरहितायाः कन्यायाः ॥ कुब्जकी १ वामनी २ श्वेता ३
हीनांगी ४ कुलच्छेदिनी ५ ॥ कटुका ६ बधिरा ७ मूका ८ पुण्यहीना ९ कलि
प्रिया १० ॥ वरदोषाः ॥ काणः १ पंगुः २ अतिदीर्घः ३ अतिह्रस्वः ४ कृष्णः
५ क्षयी ६ रोगी ७ कुष्ठी ८ दरिद्री ९ ॥ अन्यासक्तः १० ॥ एतैर्दशदोषैरहि
तः ॥ स्रुवेणवापात्रेणवाद्रव्यंघृत्वाआचार्यः दशदोषान्कथयति ॥ लत्ता १ पातो
२ युति ३ वेंधो ४ जामित्रं ५ बुधपंचकम् ॥ ६ एकार्गलं ७ उपग्रंच ८ क्रांति
साम्यंतथादरं ९ दग्धातिथिश्च १० विज्ञेयादशदोषामहाबलाः ॥ एतान्दोषान्प
रित्यज्यलग्नंसंशोधयेद्बुधः ॥ १ ॥ दशदोषान्कथयित्वा ॥ वरवधूहस्ततलांतरे

वि. प. णद्रव्यंत्याज्यते ॥ अथविष्टरंवराग्रेपूज्यम् ॥ १ ॥ त्रिविष्टरं ॥ किंविष्टरं ॥ एषदे विष्ट॰
॥१४॥ वानां ॥ १ ॥ एषऋषीणां ॥ २ ॥ एषमनुष्याणां ॥ ३ ॥ त्रयाणांविष्टरादिकउच्य
ते ॥ १ द्वादशतृणोभवेत्विप्रेक्षत्रियेचाष्टएवच ॥ षट्तृणश्चभवेद्वैश्येप्रमाणंविष्ट 32
रंबुधैः ॥ २ ॥ दूर्वांकुरैःकुशैः सूत्रैः प्रादेशेनैवसंस्मृतः ॥ विधिवत्पूजनंकृत्वाविष्ट
रैश्ववरार्चनं ॥ ॐसाधुभवानास्तामितिप्रजापतिर्ऋषिः ब्रह्मादेवतायजुर्वरार्चने
विनियोगः ॥ साधुभवानास्तामर्चिष्यामोभवंतं ॐअर्चयप्रथमंविष्टरमादाय ॥ ॐ
विष्टरोविष्टरोविष्टरः ॥ ३ ॥ प्रतिगृह्यतांप्रतिगृह्णामीत्याहविष्टरंयजमानोदेवते ॥
वर्ष्मोऽस्मीत्याथर्वणऋषिः विष्टरोदेवताऽनुप्छंदः उपवेशनेविनियोगः ॥ ॐव
र्ष्मोऽस्मिसमानानामुद्यतामिवसूर्यः ॥ इमन्तमभितिष्ठामियोमांकश्चाभिदासति॥ ॥१४॥
इत्यनेनमंत्रेणवरस्यासनतलेनिदध्यात् ॥ द्वितीयंविष्टरंदक्षिणपादतलेनिधाय ॥
ॐवर्ष्मोऽस्मीत्युच्चार्य ॥ १ ॥ दक्षिणपादंप्रक्षाल्य ॥ पाद्यं प्रतिगृह्यतांप्रतिगृह्णा

मि ॥ लाजाश्चकुसुमाश्चैवतंदुलाः पुष्पमेवच ॥ सर्वौषधिसमायुक्तंपंचांगंपाद्यमु
च्यते ॥ ब्राह्मणस्यदक्षिणंपादं अन्यजातीनां वामपादं उभेगृह्णातिवा ॥ विराजोदो
होसीतिप्रजापतिर्ऋषिः आपोदेवताः यजुःपादप्रक्षालनेजलग्रहणेविनियोगः ॥
ॐविराजोदोहोसिविराजोदोहमशीयमयिपाद्यायैविराजोदोहः । दक्षिणंपुनर्वामं
प्रक्षाल्यएभिर्मंत्रैर्वरपादार्घंकृत्वा ॥ दधिकुंकुमसंयुक्ततंदुलादभिःसंपूज्य ॥ २ ॥
अथयजमानः कल्पितमर्घंवरायनिवेदयति ॥ अर्घंप्रतिगृह्यतांप्रतिगृह्णामि कोऽ
सौअर्घः ॥ साक्षतंचहिरण्यंचफलपुष्पसमायुतम् ॥ दधिदूर्वासमोपेतमेवमर्घः
स्मृतोबुधैः ॥ तत्रमंत्रः ॥ आपस्थेतिप्रजापतिर्ऋषिः आपोदेवता यजुरर्घग्रहणे
विनियोगः ॥ ॐआपस्थयुष्माभिःसर्वान्कामानवाप्नवानि ॥ अथाभिमंत्रयतेजल
म् ॥ ॐसमुद्रेत्याथर्वणऋषिः आपोदेवताऽनुष्टुप्छंदः । अर्घाभिमंत्रणेविनियोगः
ॐसमुद्रंवःप्रहिणोमिस्वांयोनिमभिगच्छतअरिष्टास्माकंवीरामापरासेचिमत्पयः॥

प्रत्यर्घोदकंशिरसाभिवंद्यभूमौप्रवाहयेत् ॥ ततआचमनीयं प्रतिगृह्यतांप्रतिगृ
ह्णामि॥ आमागन्येतिपरमेष्ठीऋषिः आपोदेवताबृहतीछंदः आचमनेविनियोगः॥
वरश्चउदकमात्रमादाय ॥ ॐआमागन्यशसासꣳसृजवर्चसातंमाकुरुप्रियंप्रजा
नामधिपतिंपशूनामरिष्टंतनूनाम् ॥ १ ॥ स्मार्तमाचमनंकुर्यात् ॥ अथमधुप
र्कः ॥ मधुपर्केचपात्राणिविप्रादीनांयथाक्रमम् ॥ सौवर्णंराजतंताम्रंकांस्यंवर्णानु
पूर्वशः ॥ १ ॥ दधिमधुघृतंकांस्यपात्रंअपरेणआच्छादितंकांस्यपात्रेश्राद्धेपितॄ
णांवामांगेपादप्रक्षालनेतथानांदीमुखेतथापत्नीदक्षिणेमधुपर्केच ॥ १ ॥ यस्यह
स्तेप्रदातव्यमुदकंमधुपार्किकम् ॥ सप्तपदंपरिक्रम्यवैवाह्यः कथितोबुधैः ॥ २ ॥
मधुपर्कोमधुपर्कोमधुपर्कः प्रतिगृह्यतांप्रतिगृह्णामिप्रजानांमधुपर्कंतेमधु ॥ ३ ॥ वै
श्यशूद्रावुभौवर्णौमानसंविधिमाचरेत् ॥ मधुपर्केद्विजातीनांयत्किंचिद्वक्तुमर्हसि
॥ ४ ॥ अनेनमधुपर्कंचमानहीनाधिकंनहि ॥ वंशाश्मदारुधरणीतृणपल्लवनिर्मित

म् ॥ ५ ॥ मित्रस्येतिबृहस्पतिःएवंअंगिराऋषिः सवितादेवता यजुर्मधुपर्कग्रह
णेविनियोगः ॥ मित्रस्यत्वाचक्षुषाप्रतीक्षे ॥ १ ॥ अनेनमंत्रेणमधुपर्कंयजमाना
यप्रदर्शयेत् ॥ समीक्षमाणश्चउभाभ्यांहस्ताभ्यांगृहीत्वामंत्रंपठेत् ॥ ॐदेवस्यत्वा
सवितुःप्रसवेऽश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांप्रतिगृह्णामि ॥ कन्यापितासव्येपा
णौकृत्वादक्षिणस्यानामिकांगुष्ठेनमिश्रयन् नमस्येतिप्रजापतिर्ऋषिः सवितादे
वता आलोडनेविनियोगः ॥ ॐनमस्यावास्याव्यान्यशनेयत्तआविद्धंतत्तेनिकृंता
मि ॥ अनामिकांगुष्ठेनप्राच्यांदिशिबहिर्निरुक्षयतिवारत्रयम् ॥ दधिमध्येतुलो
मानिघृतमध्येतुमक्षिकाः ॥ मधुकीटाश्चमधुनित्रीनेतान्संनिरीक्षयेत् ॥ १ ॥
गोलोमश्चेद्भवेद्वंध्यामक्षिकाविधवाभवेत् ॥ मधुकीटोभवेद्द्वेश्यातततोयत्नान्निवारये
त् ॥ २ ॥ ॐयन्मधुनइतिकुशऋषिः मधुपर्कोदेवताजगतीछंदः मधुपर्कप्राश
नेविनियोगः ॥ मधुपर्कंवरहस्तेदत्त्वाप्राशयेत् वागृह्णीयात् ॥ मंत्रोयथा ॥

यन्मधुनोमधव्यंपरमꣳरूपमन्नाद्यंतेनाहंमधुनोमधव्येनपरमेणरूपेणाऽन्नाद्येनपर मोमधव्योन्नादोशानि ॥ ॐमधुवाताऽऋतायतेमधुंक्षरंतिसिंधवꣳ ॥ माध्वीर्नꣳसंत्वोषधीꣳ ॥ १ ॥ त्रिवारंजपेत् ॥ इत्यनेनवारत्रयंमधुपर्कप्राशनंकरोतिवरः ॥ आचमनं ॥ मुखादिप्राणान्संस्पृशति ॥ ॐवाङ्मआस्येऽस्तु ॥ नसोर्मेप्राणोऽस्तु ॥ अक्ष्णोर्मेचक्षुरस्तु ॥ कर्णयोर्मेश्रोत्रमस्तु ॥ बाह्वोर्मेबलमस्तु ॥ ऊर्वोर्मेओजोऽस्तु ॥ अरिष्टानिमेऽङ्गानितनूस्तन्वामेसहसंतु ॥ गौर्गौर्गौरित्यभिधाय । यजमानस्ततोवरः पठति ॥ ॐमातारुद्राणांदुहितावसूनाꣳस्वसाऽऽदित्यानाममृतस्यनाभिः ॥ प्रणुवोचंचिकितुषेजनायमागामनागामदितिंवधिष्ठ ॥ ममचामुष्यचामुकशर्मणोयजमानस्यपाप्माहतः ॥ ॐउत्सृजततृणान्यत्तु ॥ अभिमंत्र्यगामस्यैनिवेदयति ॥ ॐतत्सदितिपठित्वा ॥ गोदानंकुर्यात् ॥ इतितृणंछिंद्यात् इतिषडर्घ्यासमाप्ता ॥ अथभूमिपूजा ॐअथातःसंप्र

वक्ष्यामिभूम्याआवाहनंशुभम् ॥ आवाहयाम्यहंदेविभूमेत्वंचनमस्कृता ॥ १ ॥
जगद्धात्रीशिवासौम्याअनंतालोकमातृका ॥ मेदिनीभूतजननीदेवीपंचगुणा
त्मिका ॥ २ ॥ सर्वेश्वरीमहाभागाअप्रमेयासनातनी ॥ आवाहयामिवरदासप्त
द्वीपसमन्विता ॥ ३ ॥ साष्टंसतोरणंशीलंसप्तसागरमेखलम् ॥ अद्योहिभूतभ
व्येतिदेवीपंचगतःशिवः ॥ ४ ॥ इदमर्घमिदंपाद्यंधूपोऽयंबलिर्गृह्यतां ॥ ॐइले
द्यावापृथ्वीरीधूमहिद्यौजजुभूमिरतीरक्षसंत्यथा ॥ ॐह्रीं ॐह्रीं ॐभूमिसमअंत
रिक्ष्यमथर्वणे ॥ भूमिदेवीपृथ्वीधरणीधनाढ्याक्षमागरीशुभकर्मचपृथ्वीस्थिर
निश्चिताम् ॥ त्वंआगच्छपूजांचबलिंगृहाणआयुःकर्त्रीक्षेमकर्त्रीशुभकर्त्रीशान्ति
कर्त्रीवरदाभव ॥ भूमिदेव्यैआवाहयामि ॥ आसनंसमर्पयामि ॥ पाद्यं० ॥
अर्घ्यं० ॥ आचमनीयं० ॥ स्नानं० ॥ वस्त्रं० ॥ गंधं० ॥ अक्षतान्० ॥ पुष्पं
धूपं० ॥ दीपं० ॥ नैवेद्यं० ॥ आचमनीयं० ॥ तांबूलं० ॥ पूगीफलं० ॥ द

क्षिणां० ॥ नमः श्रीभूमिदेवताप्रसादात्सर्वविधेःपरिपूर्णतास्तु ॥ अथकुशकं
डिका ॥ अथाग्निंकांस्यपात्रयोर्वेष्टितमादाय ॥ तत्रवेदिकायाः पंचभूसंस्कारान्
कुर्यात् ॥ दर्भैः परिसमुह्य ॥ ३ ॥ गोमयेनोपलिप्य ॥ ३ ॥ उदकेनाभ्युक्ष्य
॥ ३ ॥ स्रुवेणोल्लिख्य ॥३॥ अनामिकांगुष्ठेनोद्धृत्य ॥ ३ ॥ अग्निस्थापनम् ॥
ॐ अग्निंदूतंपुरोदधेहव्यवाहमुपब्रुवे ॥ देवाँऽआसादयादिह ॥ १ ॥ ॐ त
त्सदद्येत्यादिशुभतिथौ असुकशर्माऽहंदंपत्योर्विवाहसांगतासिद्ध्यर्थंअग्निपूजनं
करिष्ये ॥ ॐआवाहयेतंपुरुषंमहांतंसुरासुरैरर्चितपादपद्मम् ॥ इंद्रादयोयस्य
मुखेवसंतिकुंडेविशत्वंसुरलोकनाथ ॥ १ ॥ अग्नयेनमः आवाहनंसमर्पयामि ॥
आसनं ॥ पाद्यं० ॥ अर्घ्यं० ॥ आचमनीयं० ॥ स्नानं० ॥ वस्त्रं० ॥ गंधं० अक्ष ॥१७॥
तान् ॥ पुष्पं० ॥ धूपं० ॥ दीपं० ॥ नैवेद्यं० आचमनीयं० ॥ तांबूलं० ॥ पूगी
फलं० ॥ दक्षिणा० ॥ नमस्कारं० ॥ श्रीअग्निदेवताप्रसादात्सर्वविधेः परिपूर्ण

38

तास्तु ॥ चत्वारः पाकयज्ञाहुतोहुतःप्रहुतःप्राशित इतिपंचसु बहिःशालायांविवा
हेचूडाकरणेउपनयनेकेशांतेसीमंतोन्नयनेउपलिप्तेउद्धृत्यचाग्निमुपसमाधायनिर्म
थ्यमेकेविवाहेउदगयनेआपूर्यमाणपक्षेपुण्याहेवरः कुमार्याः पाणिंगृह्णीयात् त्रि
षुत्रिषुउत्तरादिषुस्वातीमृगशिरोरोहिण्यांमित्रपित्रोर्मूलेऋतेचित्राश्विनीहरिवसु
भ्यइतिमृतौवातिस्रोब्राह्मणस्यवर्णानुपूर्व्येणद्वेराजन्यस्यैकावैश्यस्यसर्वेषांशूद्रा
णामप्येकेमंत्रवर्ज्यं अथैनांवासःपरिधापयति जरांगच्छपरिधत्स्ववासोभवाष्टीना
मभिशस्तिपावा ॥ शतंचजीवशरदःसुवर्चारयिंचपुत्राननुसंव्ययस्वायुष्मतीदं
परिधत्स्ववासः ॥ १ ॥ अथोत्तरीयमकृतन्निंतियाअकृतन्नवयन्याअतन्वतया
श्चदेवीतंतूनभिधत्स्ववासः ॥ २ ॥ पिताकन्यामानीयवरसंमुखीमुपवेशय
ति ॥ वरेणवासः संधानंलक्षितमाभ्यांतयोरेकीकरणेवरस्यदक्षिणभागेवधूमुपवे
शयेत् ॥ ॐसमंजंतुविश्वेदेवाःसमापोहृदयानिनौ ॥ संमातरिश्वासंधातासमुदेष्ट्री

39

दधातुनः ॥ १ ॥ ततःकन्यांप्रतिगृह्यकामःस्तुवीत ॐकोदात्कस्माअदात्कामोदा
त्कामायादात् ॥ कामोदाताकामः प्रतिगृहीताकामैतत्ते ॥ १ ॥ अथकन्यादानं ॥
दातातत्रादौकन्यापिता उदङ्मुखःस्वदक्षिणेपत्नीमुपवेश्यकुशपाणिराचम्यशं
खस्थदूर्वाक्षतफलपुष्पचंदनजलान्यादायजामातृदक्षिणकरोपरिकन्यादक्षिणक
रंनिधायॐदाताहंवरुणोराजाद्रव्यमादित्यदैवतम् ॥ वरोऽसौविष्णुरूपेणप्रति
गृह्णात्वयंविधिः ॥ अथमंगलाष्टकप्रारंभः ॥ श्रीमत्पंकजविष्टरोहरिहरौवायुर्म
हेंद्रोनलश्चंद्रोभास्करवित्तपालवरुणाः प्रेताधिपादिग्रहाः ॥ प्रद्युम्नोनलकूबरौसु
रगुरुश्चिंतामणिःकौस्तुभः स्वामीशक्तिधरश्चलांगलधरःकुर्वंतुवोमंगलम् ॥ १ ॥
गौरीश्रीरदितिर्दितिश्चसुभगाकद्रूःसुपर्णाशिवासावित्रीचसरस्वतीचसुरभीसत्य
व्रतारुंधती ॥ स्वाहाजांबवतीचरुक्मभगिनीदुःस्वप्नविध्वंसिनीवेलाचांबुनिधेः
समीनमकराकुर्वंतुवोमंगलम् ॥ २ ॥ नेत्राणांत्रितयंमहत्पशुपतेरग्नेस्तुपादत्र

यंतद्वद्विष्णुपदत्रयंत्रिभुवनेख्यातंचरामत्रयम् ॥ गंगौघस्यगतित्रयंसुविमलंतद्व
दृषीणांत्रयंसंध्यायास्त्रितयंद्विजैरभिमतंकुर्वंतुवोमंगलम् ॥ ३ ॥ गंगागोमतिगोप
तिर्गणपतिर्गोविंदगोवर्नधोगीतागोमयगोरजोगिरिसुतागंगाधरोगौतमः ॥ गा
यत्रीगरुडोगदाधरगयोगंभीरगोदावरीगंधर्वाग्रहगोपगोकुलगणाःकुर्वंतुवोमंगल
म् ॥ ४ ॥ गंगासिंधुसरस्वतीचयमुनागोदावरीनर्मदाकावेरीसरयूमहेंद्रतनयाच
र्मण्वतीवेदिका ॥ क्षिप्रावेत्रवतीमहासुरनदीख्याताचयागंडकी पुण्याः पुण्यज
लैःसमुद्रसहिताः कुर्वंतुवोमंगलम् ॥ ५ ॥ लक्ष्मीःकौस्तुभपारिजातकसुराधन्वंत
रिश्चंद्रमागावःकामदुघासुरेश्वरगजोरंभादिदेवांगनाः ॥ अश्वःसप्तमुखोसुधाहरि
धनुःशंखोविषंचांबुधेरत्नानीतिचतुर्दशप्रतिदिनं कुर्वंतुवोमंगलम् ॥ ६ ॥ अश्व
त्थोवटवृक्षचन्दनतरूमंदारकल्पद्रुमौ जांबूनिंबकर्दंबआम्रसरलावृक्षाश्चयेक्षीरि
णः ॥ सर्वैस्तैःफलपुष्पपल्लवखगैर्युक्तैःसदामंडितंरम्यंचैत्ररथंसनंदनवनंकुर्वन्तुवो

५।

मंगलम् ॥ ७ ॥ वाल्मीकिःसनकःसनंदनमुनिर्व्यासोवसिष्ठोभृगुर्जाबालीर्जमदग्नि
जह्नुजनकागर्गोऽंगिरागौतमः ॥ मांधाताऋतुपर्णवैन्यसगरौधन्योदिलीपोनलः
पुण्योधर्मसुतोययातिनहुषौकुर्वंतुवोमंगलम् ॥ ८ ॥ पूर्ववत्गौरीशङ्करावित्यने
नकन्यायाः सौभाग्यंदद्यात् ॥ इति मंगलाष्टकंसंपूर्णम् ॥ ॐतत्सदद्यश्रीब्रह्म
णोद्वितीयेपरार्धेतदादौश्रीश्वेतवाराहकल्पेसप्तमेवैवस्वतमन्वंतरेअष्टाविंशतिमे
कलियुगेकलिप्रथमचरणेजंबूद्वीपेभरतखंडे आर्यावर्तांतर्गतब्रह्मावर्तैकदेशेकुमा
रिकानामविष्णुप्रजापतिक्षेत्रेमहानद्योः श्रीगंगायमुनयोःपश्चिमेतटे नर्मदायाउ
त्तरेतटेविक्रमशकेबौद्धावतारेअमुकसंवत्सरेश्रीसूर्येअमुकायनेऽमुकऋतौमहा
मांगल्यप्रदमासोत्तमेमासेअमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुक
नक्षत्रे अमुकगोत्रप्रवरवेदशाखाध्यायीअमुकशर्माहं सदारापत्यस्यात्मनः आयुरा
रोग्यैश्वर्याभिवृद्ध्यर्थंमनोभीष्टकामनासिद्ध्यर्थं श्रीपरमेश्वरप्रीतयेममअस्याः क

न्यायाःदाताहं मंडपाधस्तात्कुलशीलसौभाग्यसामुद्रिकलक्षणलावण्ययुक्तांसाव
यवांचारोगां कांचनकुंडलकंकणनूपुरकटिसूत्रभुजकेयूरांगदभूषितांयवनालिहा
करदीपितांभ्रमरमधुपुष्पमालालंकृतांघृतकर्पूरागरुगोरोचनकर्दमांदशगंधादि
द्रव्यवासितांकुसुदमालामंडितांनवविधाभोगच्छत्रोपानद्वस्त्राशनरौप्यकमंडल्वा
शक्तौसप्तांताम्रपात्रंकांस्यपात्रंगौः दासीसंपुटसौवर्णमुद्रिकाकांचनीदीपिकांपूगी
पत्रश्रीखंडप्रत्युपहारसमन्वितांआदर्शहस्तांमदनफलभद्रहस्तांवृद्धांगुलिपूरितां
वस्त्रप्रदीपितांअमुकगोत्रांअमुकनाम्नींकन्यांत्रिमातुलशुद्धांदशपुरुषविख्यातां
वेदशास्त्रपुराणागमवद्धर्मरतामुपकल्पितोपस्करसहितां कन्यांकनकसंपन्नांकन
काभरणैर्युताम् ॥ दास्यामिविष्णवेतुभ्यंब्रह्मलोकजिगीषया ॥ ऋषयःसर्वभूता
नांसाक्षिणः सर्वदेवताः ॥ इमांकन्यांप्रदास्यामिपितृणांतारणायच ॥ १ ॥ अमु
कवेदशाखाध्यायिने अमुकवरायएकोत्तरशतकुलोद्धारायश्रेयसे तवसंतानवृद्धये

आचंद्रार्कंयावत् इमां ममसमस्तपितॄणां निर्मितनिरतिशयानंदब्रह्मलोकावा
प्तये अनेनवरेणास्यांकन्यायामुत्पाद्यजनिष्यमाणसंतत्याब्रह्मपक्षद्वादशावरान्
द्वादशपरान्प्राजापत्यपक्षेअष्टावरान्अष्टपरान्पुरुषान्पवित्रीकर्तुमात्मनश्चश्री
लक्ष्मीनारायणप्रीतये अमुकशर्मणःप्रपौत्रीम् अमुकशर्मणःपौत्रीं अमुकशर्मणः
पुत्रीम् अमुकनाम्नींकन्यांलक्ष्मीरूपां अमुकशर्मणःप्रपौत्राय अमुकशर्मणः पौत्राय
अमुकशर्मणःपुत्रायअमुकशर्मणेवरायविष्णुरूपायभार्यात्वेनतुभ्यमहंसंप्रददेप्र-
यतपाणिःशरणंप्रपद्ये स्वस्तिसंबाधेष्वभयंनोवृद्धिःइतिगोत्रोच्चारःपुनःद्विवारं प
ठेत् वरहस्तेदद्यात् ॥ दाताहंवरुणोराजाद्रव्यमादित्यदैवतं ॥ विप्रोसौविष्णुरूपे
णप्रतिगृह्णात्वयंविधिः ॥ ॐस्वस्तिइत्युक्त्वातांप्रतिगृह्णाति ॥ ॐ द्यौस्त्वाद ॥२०॥
दातुपृथिवीत्वांप्रतिगृह्णातु ॥ कन्यादानंमहादानंसर्वदानेषुदुर्लभम् ॥ तदद्यदै
वयोगेनत्वंचगृह्णासिहेवर ॥ ३ ॥ तथाचगांतन्निष्क्रयद्रव्यंवाएतत्कन्यादानप्र

तिष्ठासिद्ध्यर्थंइदंहिरण्यमग्निदैवतं प्रजापतिरूपिणेवरायतुभ्यमहंसंप्रददे ॥ १ ॥
वरहस्तोपरिजलधारांकुर्यात् ॥ ॐकन्या तारयतु पुण्यंवर्धतां । शिवाआपः
संतु । सौमनस्यमस्तु । अक्षतंचारिष्टंचास्तु । दीर्घमायुःश्रेयःशांतिःपुष्टिस्तुष्टि
श्चास्तु । यच्छ्रेयस्तदस्तु । यत्पापंरोगमशुभमकल्याणंदूरेतत्प्रतिहतमस्तु पु
ण्याहंभवंतोब्रुवंतुअस्तुश्रीरितिप्रतिवचनमितिस्वस्तिवाचनंकृत्वा ॥ द्यौःशांतिः
इतिपठनीयम् ॥ अस्याःसोऽपितंदक्षिणहस्तंसांगुष्ठंगृह्णाति ॥ प्रार्थना ॥ यस्त्वया
चर्यतेधर्मःकर्तव्यश्चानयासह ॥ धर्मेचार्थेचकामेचनातिचरितव्यात्वयेयं ॥ अहं
नातिचरामीतिवरोब्रूते ॥ गौरींकन्यामिमांविप्रयथाशक्त्याविभूषिताम् ॥ गोत्राय
शर्मणेतुभ्यंदत्तांमेप्रतिपालय ॥ २ ॥ कन्येमेचाग्रतोभूयाःकन्येमेदेविपार्श्वयोः ॥
कन्येमेपृष्ठतोभूयास्त्वद्दानान्मोक्षमाप्नुयाम् ॥ ३ ॥ ममवंशसमुत्पन्नापोषिताव
त्सराष्टकं ॥ तुभ्यंवरमयादत्तापुत्रपौत्रविवर्द्धिनी ॥ ४ ॥ कन्यारत्नमिदंदानंमया

दत्तंतवानघ ॥ स्वदेशेपरदेशेवापरिपाल्याकुलोचितम् ॥ ५ ॥ मयापिदत्ता इति
कन्यामाताब्रूयात् ॥ वरःगोमिथुनद्रव्यदानंनानागोत्रेभ्योब्राह्मणेभ्योभूयसीदक्षि
णाश्चाहंसंप्रददे ॥ १ ॥ ततःकुशकंडिकांसमाप्य ॥ अद्य० एवंगुणविशेषणवि
शिष्टायांशुभपुण्यतिथौममधर्मार्थकामेतित्रिविधपुरुषार्थप्राप्त्यर्थंपरिगृहीताया
अस्याःकन्यायावधूत्वसिध्यर्थंअस्मिन्योजकनामाग्नौआघाराज्यभागामहाव्याहृ
तिसर्वप्रायश्चित्तावापसंज्ञकराष्ट्रभृज्जयाभ्यातानाग्निरित्यादिपंचककन्याकर्तव्य
लाजाहोमानंतरप्राजापत्यस्विष्टकृद्धोममहंकरिष्ये ॥ ततःआघाराज्यभागादिन
वाहुंत्यंतंहुत्वा ॥ अथराष्ट्रभृद्धोमः ॥ ॐऋताषाडृतधामाग्निर्गंधर्वꣳसनइदंब्रह्म
क्षत्रंपातुतस्मैस्वाहावाट् ॥ इदंऋतासाहेऋतधाम्नेऽग्नयेगंधर्वायनमम ॥ १ ॥
ॐऋताषाडृतधामाग्निर्गंधर्वस्तस्यौषधयोऽप्सरसोमुदोनामताभ्यꣳस्वाहावाट्॥
इदमोषधीभ्योऽप्सरोभ्योमुद्भ्योन० ॥ २ ॥ सꣳहितोविश्वसामासूर्यौगंधर्वꣳसनं

46

इदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट् ॥ इदंसᳫंहितायविश्वसाम्नेसूर्यायगंधर्वायन० ॥
॥ ३ ॥ सᳫंहितोविश्वसामासूर्योगंधर्वस्तस्यमरीचयोऽप्सरसआयुवोनामताभ्यᳫं
स्वाहा ॥ इदंमरीचिभ्योऽप्सरोभ्यआयुभ्योन० ॥४॥ ॐसुषुम्णःसूर्यरश्मिश्चंद्रमा
गंधर्वᳫंसनइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट् ॥ इदंसुषुम्णायसूर्यरश्मयेचंद्रमसेगं
धर्वाय० ॥ ५ ॥ ॐसुषुम्णᳫंसूर्यरश्मिश्चंद्रमागंधर्वस्तस्यनक्षत्राण्यप्सरसोभेकुरं
योनामताभ्यᳫंस्वाहा ॥ इदंनक्षत्रेभ्योऽप्सरोभ्योभेकुरिभ्योन० ॥६॥ ॐइषिरोवि
श्वव्यचावातोगंधर्वः सनइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट् ॥ इदमिषिरायविश्वव्य
चसे वातायगंधर्वायन० ॥ ७ ॥ ॐइषिरोविश्वव्यचावातोगंधर्वस्तस्यापोअप्स
रसऊर्जोनामताभ्यᳫंस्वाहा ॥ इदमद्भ्योऽप्सरोभ्यऊर्ग्भ्योन० ॥ ८ ॥ ॐभुज्युᳫं
सुपर्णोयज्ञोगंधर्वᳫंसनइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट् ॥ इदंभुज्यवेसुपर्णायय
ज्ञायगंधर्वाय नम० ॥ ९ ॥ ॐभुज्युᳫंसुपर्णोयज्ञोगंधर्वस्तस्यदक्षिणाप्सरसस्ता

वानामताभ्युꣳस्वाहा ॥ इदंदक्षिणाभ्योऽप्सरोभ्यस्तावाभ्योन॰ ॥ १० ॥ ॐप्र
जापतिर्विश्वकर्मामनोगंधर्वꣳसनइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट् ॥ इदंप्रजाप
पतयेविश्वकर्मणेमनसेगंधर्वायन॰ ॥ ११ ॥ ॐप्रजापतिर्विश्वकर्मामनोगंधर्वस्त
स्यंऋक्सामान्यप्सरसएष्टयोनामताभ्युꣳस्वाहा इदंऋक्सामेभ्योऽप्सरोभ्यएष्टि
भ्योन॰ ॥ १२ ॥ इतिराष्ट्रभृद्धोमः ॥ अथजयाहोमः ॥ ॐ चित्तंचस्वाहा इदं
चित्तायनमम ॥ १ ॥ ॐचित्तिश्चस्वाहा इदंचित्त्यै॰ ॥ २ ॥ ॐआकूतंचस्वाहा ॥
इदमाकूताय॰ ॥ ३ ॥ ॐआकूतिंचस्वाहा इदमाकूत्यै॰ ॥ ४ ॥ ॐविज्ञातंच
स्वाहा इदंविज्ञाताय॰ ॥ ५ ॥ ॐविज्ञातिंचस्वाहा ॥ इदंविज्ञात्यै॰ ॥ ६ ॥ ॐम
नश्चस्वाहा ॥ इदंमनसे॰ ॥ ७ ॥ ॐशक्करीश्चस्वाहा ॥ इदंशक्करीभ्यो॰ ॥ ८ ॥
ॐदर्शश्चस्वाहा इदंदर्शाय॰ ॥ ९ ॥ ॐ पौर्णमासंचस्वाहा ॥ इदंपौर्णमासाय॰ ॥
॥ १० ॥ ॐ बृहच्चस्वाहा ॥ इदंबृहते॰ ॥ ११ ॥ ॐरथंतरंचस्वाहा ॥ इदंरथंतरा

य० ॥१२॥ ॐप्रजापतिर्जयानिंद्रायवृष्णेप्रायच्छदुग्रःपृतनाजयेषु ॥ तस्मैविशः समनमंतसर्वासउग्रः सइहव्योबभूव स्वाहा ॥ इदंप्रजापतयेजयेभ्यइन्द्रायचन मम ॥ इतिजयाहोमः ॥ अथाभ्यातानहोमः ॥ ॐअग्निर्भूतानामधिपतिःसमावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मण्यस्यांदेवहूत्याᳪस्वाहा ॥ इदमग्नयेभूतानामधिपतये इदं० ॥१॥ ॐइंद्रोज्येष्ठानामधिपतिः समावत्वस्मिन्० ॥ इदमिंद्रायज्येष्ठानामधिपतये० ॥ २ ॥ अंतर्धानं ॥ यमाहुतेर्दक्षिणस्यांत्यागः ॥ ॐयमःपृथिव्याअधिपतिःसमावत्वस्मिन्० ॥ इदंयमाय पृथिव्याअधिपतये० ॥ ३ ॥ अंतर्धानमुत्सार्यप्रणीतोदकमुपस्पृशेत् ॥ ॐवायुरंतरिक्षस्याधिपतिः समावत्वस्मिन्० ॥ इदंवायवेअंतरिक्षस्याधिपतये० ॥ ॥ ४ ॥ ॐसूर्योदिवोऽधिपतिः समावत्वस्मिन्० ॥ इदंसूर्यायदिवोऽधिपतये० ॥ ॥ ५ ॥ ॐचंद्रमानक्षत्राणामधिपतिः समावत्मस्मिन्० ॥ इदंचंद्रमसेनक्षत्राणा

मधिपतये० ॥ ६ ॥ ॐबृहस्पतिर्ब्रह्मणोऽधिपतिः समावत्वस्मिन्० ॥ इदंबृहस्प
तयेब्रह्मणोऽधिपतये० ॥ ७ ॥ ॐमित्रःसत्यानामधिपतिः समावत्वस्मिन्० ॥
इदंमित्रायसत्यानामधिपतये० ॥ ८ ॥ ॐवरुणोऽपामधिपतिःसमावत्वस्मिन्०
इदंवरुणायापामधिपतये० ॥९॥ ॐसमुद्रःस्रोत्यानामधिपतिःसमावत्वस्मिन्० ॥
इदंसमुद्रायस्रोत्यानामधिपतये० ॥ १० ॥ ॐअन्नꣳसाम्राज्यानामधिपतिः
समावत्वस्मिन्० ॥ इदमन्नायसाम्राज्यानामधिपतये० ॥ ११ ॥ ॐसोमओ
षधीनामधिपतिः समावत्वस्मिन्० ॥ इदंसोमायओषधीनामधिपतये० ॥ १२ ॥
ॐसविताप्रसवानामधिपतिःसमावत्वस्मिन्० ॥ इदंसवित्रेप्रसवानामधिपतये०
॥ १३ ॥ अंतरपटधारणं ॥ ॐरुद्रःपशूनामधिपतिःसमावत्वस्मिन्० ॥ ईशकोणे
त्यागः ॥ इदंरुद्रायपशूनामधिपतये० ॥ अंतरपटमुत्सार्यप्रणीतोदकमुपस्पृशेत् ॥
॥ १४ ॥ ॐत्वष्टारूपाणामधिपतिःसमावत्वस्मिन्० ॥ इदंत्वष्ट्रेरूपाणामधिपत

ये० ॥ १५ ॥ ॐविष्णुःपर्वतानामधिपतिःसमावत्वस्मिन्० ॥ इदंविष्णवेपर्वता
नामधिपतये० ॥ १६ ॥ ॐ मरुतोगणानामधिपतिःसमावत्वस्मिन्० ॥ इदंमरु
द्भ्योगणानामधिपतिभ्यः० ॥ १७ ॥ अंतरपटः ॥ ॐपितरःपितामहाःपरेवरेत
तास्ततामहाःइहमावत्वस्मिन् ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मि
न्कर्मण्यस्यांदेवहूत्याँस्वाहा (दक्षिणाग्नेययोर्मध्येत्यागः ॥ इदंपितृभ्यःपरे
भ्योऽवरेभ्यस्ततेभ्यस्ततामहेभ्योनमम ॥ १८ ॥ जवनिकांनिःसार्यप्रणीतोदक
स्पर्शः) अथपंचाहुतयः ॥ ॐअग्निरैतुप्रथमोदेवतानाँसोस्यैप्रजांमुंचतुमृत्यु
पाशात् ॥ तदयँराजावरुणोनुमन्यतांयथेयँस्त्रीपौत्रमघंनरोदात्स्वाहा ॥ इदम
ग्नयेनमम ॥ १ ॥ ॐइमामग्निस्त्रायतांगार्हपत्यःप्रजामस्यैनयतुदीर्घमायुः ॥
अशून्योपस्थाजीवतामस्तुमातापौत्रमानंदमभिविबुध्यतामियँस्वाहा ॥ इद
मग्नये० ॥ २ ॥ ॐस्वस्तिनोअग्नेदिवापृथिव्याविश्वानिधेह्ययथायजत्र ॥ यद

स्यांमयिदिविजातंप्रशस्तंतदस्मासुद्रविणंधेहिचित्रꣳस्वाहा ॥ इदमग्नये० ॥ ॥ ३ ॥ (अंतरपटः) ॐसुगन्नुपंथांप्रदिशन्नएहिज्योतिष्मद्धेह्यजरन्नआयुः ॥ अपैतुमृत्युरमृतंमआगाद्वैवस्वतोनोअभयंकृणोतुस्वाहा ॥ इदंवैवस्वताय० ॥ (दक्षिणस्यांत्यागः ॥ ४ ॥ ॐपरंमृत्योअनुपरेहिपंथांयस्तेअन्यइतरोदेवयानात् ॥ चक्षुष्मतेश्रृण्वतेतेब्रवीमिमानःप्रजाꣳरीरिषोमोतवीरान्स्वाहा ॥ इदंमृत्यवे० ॥ ५ ॥ अंतरपटंनिःसार्यप्रणीतोदकमुपस्पृशेत् ॥) अथलाजाहोमः ॥ वरकन्येउत्थाप्य ॥ अत्रसतिलकेनमातुलेनाग्न्युपरिस्रुवेणछादनंवेदमानंकुर्यात् ॥ (भाषायांमामासेवरा) ॥ ४ ॥ मंत्रः ॥ ॐपश्येमशरदःशतंजीवेमशरदःशतंशृणुयामशरदःशतं प्रब्रवामशरदःशतमदीनाःस्यामशरदःशतंभूयश्चशरदःशतात् ॥ १ ॥ लाजामाज्यंस्रुवंकुंभंद्विजमश्मानमेवच ॥ एताश्चबाह्यतःकृत्वाशेषस्यैवप्रदक्षिणा ॥ १ ॥ लाजामाज्यंस्रुवंकुंभमश्मानंऋत्विजंतथा ॥ प्रद

क्षिणांप्रकुर्वंतिदंपत्योर्भयमादिशेत् ॥ १ ॥ अथकुमार्याभ्राताशमीपलाशमिश्रा
न्लाजानंजलिनाधिजुहोति ॥ अनेनमंत्रेण ॥ स९हितेनातिष्ठत्तमनदैवत्वं ॥
ॐअर्यमणंदेवंकन्यामग्निमयक्षत ॥ सनोअर्यमादेवःप्रेतोमुंचतुमापतेःस्वाहा ॥
॥ १ ॥ इदमर्यम्णे० ॥ प्रथमपरिक्रमणे ॥ १ ॥ ॐइयंनार्युपब्रूतेलाजानावपंति
का ॥ आयुष्मानस्तुमेपतिरेधंतांज्ञातयोममस्वाहाइदमग्नये० ॥ २ ॥ ॐइमांला
जानावपाम्यग्नौसमृद्धिकरणंतवममतुभ्यंचसंवननंतदग्निरनुमन्यतामियᳬंस्वा
हा ॥ ३ ॥ इदमग्नयेनमम ॥ तृतीयपरिक्रमणे ॥ तूष्णींचतुर्थआहुतीआरभेत् ॥
मंत्रः ॥ परिक्रमणस्य ॥ हरेवासुदेवाप्रभूतेमुरारेधुरारेमुकुंदहृषीकेशनामानिसा
मानितुभ्यानि ॥ ४ ॥ इतिचतुर्थपरिक्रमणे ॥ ॐभगायस्वाहा इदंभगाय० ॥
॥ ४ ॥ चतुर्थपरिक्रमणेवरोऽग्रेभवति ॥ अथैनामश्मानमारोहयत्युत्तरतोऽग्नेर्दक्षि
णपादेन ॥ आरोहेममश्मानमश्मेवत्व९स्थिराभवअभितिष्ठपृतन्यतोऽवबाधस्व

पृतनासामानियतः ॥ वरायध्रुवंदर्शयति ॥ ध्रुवमसिध्रुवंध्रुवत्वापश्यामिध्रुवै
धिपोष्यामयिमह्यंत्वादात्बृहस्पतिर्मयापत्याप्रजावतीसंजीवशरदःशतम् ॥ १ ॥
दिवाविवाहेसूर्यावेक्षणंतच्चक्षुर्देवहितंपुरस्तादिति ॥ ततःचतुर्युगानि ॥ ॐयदा
भवे पृथिवीकृतयुगमधितोयंतदाभवे पृथिवीअचलस्यस्तंभंआकाशमंडपंसमुद्र
स्यकलशंसुवर्णस्यपात्रंरत्नस्यअक्षतंब्रह्माआचार्यःकन्याचगौरीवरःश्रीईश्वरोदेव
देवःपुण्यकालेवरतुभ्यंनित्यंआपःशिवाःशिवतमाःशांताःशांततमास्तास्तेकृण्वंतु
भेषजम् ॥ २ ॥ गंधर्वश्चैवतत्सर्वंदंपत्योरक्षतांसदा ॥ गंधर्वोदेवतारूपआशीर्वा
दंददातुनौ ॥ १ ॥ ॐयदाभवेपृथिवीत्रेतायुगमधितोयंतदाभवेपृथिवीसुवर्णस्य
स्तंभंपटवस्त्रमण्डपंरजतस्यपात्रंगंगायाःकलशंमुक्ताफलंअक्षतंवसिष्ठआचार्यःक
न्याचसीतावरःश्रीरामोदेवःपुण्यकालेवरतुभ्यंनित्यंआपःशिवाःशिवतमाःशांताः
शांततमास्तास्तेकृण्वंतुभेषजम् ॥ २ ॥ चित्तिचतीतितत्सर्वानाहुतीनांत्रयोदश

54

॥ रक्षेतचउमारुद्रविश्वेदेवैःसमन्विता ॥ २ ॥ ॐयदाभवेपृथिवीद्वापरयुगमधितो
यंतदाभवेपृथिवीश्रीखंडंचंदनस्यस्तंभंभूर्जपत्रमंडपंताम्रस्यपात्रंमुक्ताफलअक्षतं
दुर्वासाआचार्यः कन्याचद्रौपदीवरःश्रीअर्जुनोदेवदेवःपुण्यकालेवरतुभ्यंनित्यं
आपःशिवाःशिवतमाःशांताःशांततमास्तास्तेकृण्वंतुभेषजम् ॥ ३ ॥ गोविंदोगो
कुलेजातः क्रीडितोगोपबालकैः ॥ तुष्टिपुष्टिकरोऽस्माकमायुरारोग्यकारकः ॥
॥ ५ ॥ ॐयदाभवेपृथिवीकलियुगमधितोयंतदाभवेपृथिवीहरिद्रंशस्यस्तंभंसूत्रव
स्त्रमंडपंकुंभस्यकलशंतंदुलाअक्षतंतंदुलाअक्षतंमाघआचार्यःकन्याचभानुमतीव
रःश्रीभोजराजोदेवदेवःपुण्यकालेवरतुभ्यंनित्यंआपःशिवाःशिवतमाःशांताः शां
ततमास्तास्तेकृण्वंतुभेषजम् ॥ ४ ॥ चिरंजीवमहातेजाउभयोश्चचिरायुषम् ॥ प्र
यच्छतुहरिर्देवोमनसाचिंतितंध्रुवम् ॥ ४ ॥ इतिचतुर्युगम् ॥ आवाहनंसमर्पया
मि ॥ आसनं० ॥ पाद्यं० ॥ अर्घ्यं० ॥ आचमनीयं० ॥ स्नानं० ॥ वस्त्रं० ॥ गं

धं० ॥ अक्षतान्० ॥ अलंकारान्० ॥ पुष्पं० ॥ धूपं० ॥ दीपं० ॥ नैवेद्यं० ॥ आचमनीयं० ॥ तांबूलं० ॥ पूगीफलं० ॥ दक्षिणां० ॥ नमस्कारं समर्पयामि श्रीचतुर्युगप्रसादात्सर्वविधेःपरिपूर्णतास्तु ॥ अथ अंतःपटं ॥ वरमातुलस्यवस्त्रंवरकन्यकयोःपुरःदापनीयम् ॥ हकारंतुपुनर्गर्ज्यंरकारंचततोनरः ॥ हरिहरौद्वयोर्देवौमुख्यौसर्वफलप्रदौ ॥ १ ॥ क्रोधमानंद्वयंदेवअहंकारंपुनःपुनः ॥ वसीतांकंठहारस्यकिंतुल्यैर्गरुडध्वजैः ॥ २ ॥ स्थानंप्रधानंनबलंप्रधानंस्थानेस्थितःकापुरुषोऽपिशूरः ॥ जानामिनागेंद्रतवप्रभावंकंठेस्थितोगर्जसिशंकरस्य ॥३॥ शंकरकंठंविनालभ्यतृणमात्रंतवोपमा ॥ सर्वेषांशृण्वतामेवगिरिजावाक्यमब्रवीत् ॥ अंतःपटंसुखार्थेचत्वयादेवपितामह ॥ ४ ॥ वरकन्याचिरंजीव ॥ इतिअंतःपटविधिः ॥ अथसप्तपदी ॥ आदौतातवरंपश्येत्पश्चात्पश्येद्धनंकुलम् ॥ यदिनास्तिवरोविद्वान्किंकर्तव्यंधनैःकुलैः ॥ १ ॥ अंधायहीनवित्तायबधिरायशठायच ॥ व्यसना

56

सक्तचित्तायनदेयाकन्यकाबुधैः ॥ २ ॥ नातिदूरेसमीपस्थेनात्याढ्येनातिदुर्बले ॥
वृत्तिहीनेचमूर्खेचषट्सुकन्यानदीयतां ॥ ३ ॥ नोदकेननवावाचाकन्यायाःपतिरु
च्यते ॥ पाणिग्रहणसंस्कारात्पतित्वंसप्तमेपदे ॥ ४ ॥ मंडपंमधुपर्कंचलाजाहो
मस्तथैवच ॥ यावत्कन्यानवामांगेतावत्कन्याकुमारिका ॥ ५ ॥ कन्योवाच ॥
नेत्रेचनासिकाबाहूकर्णौपादौपयोधरौ ॥ रथपक्षीकथ्यतेचकन्याअंगसमौसमी ॥
॥ ६ ॥ वरउवाच ॥ दानंचवचनंविद्याखड्गंचस्वर्णभोजनम् ॥ तुलापाणिग्रहाणां
चदीर्घदक्षिणआसने ॥ ७ ॥ कन्योवाच ॥ तीर्थव्रतोद्यापनयज्ञदानंमयासहत्वंय
दिकांतकुर्याः ॥ वामांगमायामितदात्वदीयंजगादवाक्यंप्रथमंकुमारी ॥ १ ॥ ह
व्यप्रदानैरमरान्पितॄंश्चकव्यप्रदानैर्यदिपूजयेथाः ॥ वामांगमायामितदात्वदीयं
जगादकन्यावचनंद्वितीयम् ॥ २ ॥ कुटुंबरक्षाभरणेयदित्वंकुर्याःपशूनांपरिपाल
नंच ॥ वामांगमायामितदात्वदीयंजगादकन्यावचनंतृतीयम् ॥ ३ ॥ आयव्ययौ

धान्यधनादिकानांपृष्टानिवेशंप्रग्रहंविदध्याः ॥ वामांगमायामितदात्वदीयंजगा
दकन्यावचनंचतुर्थम् ॥ ४ ॥ देवालयारामतडागकूपवापीर्विदध्यायदिपूजयेथाः ॥ वामांगमायामितदात्वदीयंजगादकन्यावचनंचपंचमम् ॥ ५ ॥ देशांतरे
वास्वपुरांतरेवायदाविदध्याःक्रयविक्रयंत्वम् ॥ वामांगमायामितदात्वदीयंजगाद
कन्यावचनंचषष्ठम् ॥ ६ ॥ न सेवनीयापरिपारकीयात्वयाभवेद्भावनिकामनानि ॥ वामांगमा० सप्तमंच ॥ ७ ॥ वरउवाच ॥ मदीयचित्तानुगतंचचित्तंसदामदाज्ञापरिपालनंच ॥ प्रतिव्रताधर्मपरायणात्वंकुर्याःसदासर्वमिदंप्रयत्नम् ॥ १ ॥
वरकन्याचिरंजीव ॥ अथवरस्यवामभागेकन्योपवेशनंतदनंतरंपाणिपीडनंमोचयेत् ॥ हस्तालंभनम् ॥ हस्तालंभेभवेत्प्रीतिस्तलालंभेतथैवच ॥ सप्तपदेचदिव्यंचलाजाहोमेतुआयुषम् ॥ हस्तालंभनम्हृदयमालभतेवरोवध्वाः ॥ दक्षिणसंबंधिहृदयमालभते ॥ ममव्रतेतेहृदयंदधामिममचित्तमनुचित्तंतेऽस्तु ॥ ममवाचमे

58

कमनाजुषस्व प्रजापतिनात्वंनियुक्तामह्यम् ॥ १ ॥ पश्चात्संकल्पंकृत्वास्थापित
देवतानामुत्तरपूजनंकुर्यात् ॥ विसर्जनम् ॥ यांतुदेवगणाःसर्वेपूजामादायमाम
कीम् ॥ इष्टकामप्रसिद्ध्यर्थंपुनरागमनायच ॥ १ ॥ स्वस्तिवाचनंकुर्यात् ॥ इति
विवाहपद्धतिः समाप्ता ॥ अथवाणीराजोदितं मंगलाष्टकम् ॥ लक्ष्मीर्यस्यपरि
ग्रहः कमलभूः सूनुर्गरुत्मांस्तथा नेत्रेचंद्रबिभीषणौसुरगुरुःशेषस्तुशय्यासनः ॥
ब्रह्मांडंवरमंदिरंसुरगणायस्यप्रभोः सेवकाः सत्रैलोक्यकुटुंबपालनपरः कुर्यात्स
दामंगलम् ॥ १ ॥ ब्रह्मावायुगिरीशशेषगरुडा देवेंद्रकामौगुरुश्चंद्राकौंवरुणानि
लौमनुयमौवित्तेशविद्येश्वरौ ॥ नासत्यौनिर्ऋतिर्मरुद्गणयुताः पर्जन्यमित्रादयःस
त्रैकासुरपुंगवाः प्रतिदिनं कुर्युःसदामं० ॥ २ ॥ मांधातानहुषोंऽबरीषसगरौरा
जापृथुर्हैहयः श्रीमान्धर्मसुतोनलोदशरथोरामोययातिर्यदुः ॥ इक्ष्वाकुश्चविभी
षणश्चभरतश्चौत्तानपादिर्ध्रुव इत्याद्याभुविपार्थिवाः प्रतिदिनं कुर्युः० ॥ ३ ॥

श्रीमेरुर्हिमवांश्चमंदरगिरिः कैलासशैलस्तथा माहेंद्रोमलयाद्रिर्विंध्यनिषधाःसिं
हस्तथारैवतः ॥ सह्याद्रिर्वरगंधमादनगिरिर्मैनाकगोमंतकौ इत्याद्याभुविभूभृतः
प्रतिदिनं कुर्युः सदामं० ॥ ४ ॥ विश्वामित्रपराशरौभृगुरथागस्त्यः पुलस्त्यः
क्रतुःश्रीमानत्रिमरीचिकौत्सपुलहाः शक्तिर्वसिष्ठोंऽगिराः ॥ मांडव्योजमदग्नि
गौतमभरद्वाजादयस्तापसाः श्रीविष्णोर्गुणराशिकीर्तनपराः कुर्युःसदामंगलम्
॥ ५ ॥ गंगासिंधुसरस्वतीचयमुनागोदावरीनर्मदाकृष्णाभीमरथीचफल्गुशरयू
श्रीगंडकीगोमती ॥ कावेरीकपिलाप्रयागवनितावेत्रावतीत्यादयोनद्यःश्रीहरिपा
दपंकजभवाःकुर्युःसदामं० ॥ ६ ॥ वेदाश्चोपनिषद्गणाश्चविविधाःसांगाःपुराणा
न्वितावेदांताअपिमंत्रतंत्रसहितास्तर्काःस्मृतीनांगणाः ॥ काव्यालंकृतिनीतिना
टकगणाःशब्दाश्चनानाविधाःश्रीविष्णोर्गुणराशिकीर्तनपराःकुर्युःसदामंगलम् ॥
॥ ७ ॥ आदित्यादिनवग्रहाःशुभकरामेषादयोराशयोनक्षत्राणिसयोगकाःसति

थयस्तद्देवतास्तद्गुणाः ॥ मासाब्दाऋतवस्तथैवदिवसाःसंध्यास्तथारात्रयः
सर्वेस्थावरजंगमाःप्रतिदिनंकुर्युःसदामं० ॥ ८ ॥ इत्येतद्वरमंगलाष्टकमिदंश्री
वाणिराजोदितंव्याख्यानंपठतामभीष्टफलदंसर्वाशुभध्वंसनं ॥ मांगल्यादिशुभ
क्रियासुसततंसंध्यासुप्रातःपठेत् सर्वार्थान्समुपागतान्प्रतिदिनं कुर्यात्सदामं० ॥
॥ ९ ॥ इति०॥ अथकालिदासोक्तंमंगलाष्टकम् ॥ ४॥ श्रीमत्पंकजविष्टरोहरिह
रौवायुर्महेंद्रोऽनलश्चंद्रोभास्करवित्तपालवरुणाःप्रेताधिपादिग्रहाः ॥ प्रद्युम्नोनल
कूबरःसुरगजश्चिंतामणिःकौस्तुभःस्वामीशक्तिधरश्चलांगलधरःकुर्वंतुवोमंगलम्
॥ १ ॥ गंगागोमतिगोपतिर्गणपतिर्गोविंदगोवर्धनोगीतागोमयगौरिजोगिरिसु
तागंगाधरोगौतमः ॥ गायत्रीगरुडोगदाधरगयागंभीरगोदावरी गंधर्वग्रहगोप
गोकुलगणाः कुर्वंतु० ॥ २ ॥ नेत्राणांत्रितयंशिवापशुपतीअग्नित्रयंपावनं पुण्यं
विष्णुपदत्रयंत्रिभुवनं ख्यातंचरामत्रयं ॥ गंगावाहपथत्रयंत्रिकमलंवेदत्रयंत्रि

स्वरं संध्यातांत्रितयंसदागतभयंकुर्यात्सदामं० ॥ ३ ॥ गौरीश्रीःकुलदेवताच
सुभगाकद्रूर्महेंद्रप्रियासावित्रीचसरस्वतीसुरनदीसत्यव्रतारुंधती ॥ सत्याजांबव
तीचरुक्मभगिनीस्वाहापितॄणांप्रिया वेलाचांबुनिधेःसमीनमकरा कुर्वंतु० ॥
॥ ४ ॥ अश्वत्थोवटचंदनौसुरतरुर्मंदारकल्पद्रुमौ जंबुप्लक्षकदंबनिंबसरलावृक्षा
श्चयेक्षीरिणः ॥ स्वर्गेयेखलुपारिजातकसुरावैभ्राजितेराजितेरम्येचैत्ररथेचचंद
नवनेकुर्वन्तु० ॥ ५ ॥ वाल्मीकिश्चसनंदनंदनमुनिर्व्यासोवसिष्ठोभृगुर्जाबालि
र्जमदग्निरामजनकौ गर्गोऽगिरागौतमः ॥ मांधाताभरतोनृगश्चसगरोधन्योदि
लीपोनलः पुण्योधर्मसुतोययातिनहुषाःकुर्वन्तु० ॥ ६ ॥ लक्ष्मीःकौस्तुभपारि
जातकसुराधन्वन्तरिश्चंद्रमा गावःकामदुघाः सुरेश्वरगजोरंभादिदेवांगनाः ॥ अ
श्वःसप्तमुखोसुधाहरिधनुः शंखोविषंचांबुधेरत्नानीतिचतुर्दशप्रतिदिनंकुर्वंतु०॥
॥ ७ ॥ गंगासिंधुसरस्वतीचयमुनागोदावरीनर्मदाकावेरीशरयूर्महेंद्रतनया चर्म

ण्वतीवेदिका ॥ क्षिप्रावेत्रवती महासुरनदीख्यातागयागंडकीपूर्णाः पुण्यजलैः समुद्रसहिताः कुर्वन्तु० ॥ ८ ॥ इत्येवंवरमंगलाष्टकमिदंपापौघविध्वंसनंपुण्यंसत्प्रतिकालिदासकविनाप्रातः प्रबोधेकृतम् ॥ यः प्रातः शृणुयात्समाहितमना दत्त्वामहादक्षिणांगंगासागरसंगमोद्भवफलंप्राप्नोतिपुण्यंमहत् ॥ ९ ॥ ४५ ॥ इतिकालिदासकृतंमं० ॥ अथ गोत्रप्रवरमंगलत्रयम् ॥ गणपतिभृगुपूर्वर्षीन्नमस्कृत्यगोत्रप्रवरगणविशिष्टंनिर्णयंशास्त्रसारम् ॥ सुजनबुधजनानांप्रीतयेसंप्रवक्ष्ये सुगममममलवृत्तैर्मंगलाशीर्वचोभिः ॥ १ ॥ वर्गाःसप्तभृगोस्तथांकशशिनः सर्वेऽगिरोजःपृथक् चत्वारोऽत्रिवसिष्ठकश्यपगणाएकोगणोऽगस्त्यजः ॥ विश्वामित्रगणादशैकरहिताः पंचाशदेषांगणाअन्येभ्यश्चततोऽत्रगोत्रनिचयाःकुर्वंतुवोमंगलम् ॥ २ ॥ एतेभार्गवजामदग्न्यजगणावत्सार्ष्टिषेणाविदासागोत्र्यंमिथएषुच त्रिषुचतुर्वर्गाःपरेभार्गवाः ॥ यास्कामित्रयुवोहिवैन्यशुनकाभिन्नेन्यगोत्रागणेस्वे

स्वे ते सकुलाः सहैवभृगुणाकुर्वंतुवोमंगलम् ॥३॥ अथरामकविकृतमंगलाष्टकम्
॥ ८ ॥ नत्वादौनृहरिंभवंगणपतिं वाग्देवतांरेणुकां रुद्राणींभुवनेश्वरींभगवतीं
श्रीकालिदासादिकान् ॥ रुक्मिण्याहरणं यथामतिकवीरामाऽभिधानोमहद्भृत्यो
वर्णयतिप्रभूतयशसेकुर्वंतुवोमंगलम् ॥ १ ॥ स्वस्तिश्रीशकवत्सरोऽयनऋतुर्मा
सश्चपक्षस्तथा नक्षत्रंतिथिवारयोगकरणं यामंनिशार्धादिकम् ॥ आदित्यादिनव
ग्रहाःशुभफलं लग्नंचवेलांशकैर्दैवज्ञः सुहृदश्चलक्ष्मितनयाः कुर्वंतुवोमंगलम् ॥
॥ २ ॥ सिद्धार्थादधिपात्रमक्षतयुतंकुंभः प्रपूर्णोजलैः पुष्पंचंदनशंखसुस्वरछटा
गोरोचनंश्रीफलम् ॥ विप्रावेदविदः प्रभातसमयेगौःकांचनंव्रीहयो दूर्वागृहति
तंडुलाः प्रतिदिनं कुर्वंतुवोमंगलम् ॥ ३ ॥ ब्रह्मावेदपतिःशिवःपशुपतिःसूर्योग्र
हाणांपतिः शक्रोदेवपतिर्नलोनरपतिःस्कंदश्चसेनापतिः ॥ विष्णुर्यज्ञपतिर्यमः
पितृपतिस्तारापतिश्चंद्रमा इत्येते पतयः सुपर्णसहिताःकुर्वंतुवोमंगलम् ॥ ४ ॥

ब्रह्माज्ञानरसायनेस्मृतिगणा वेदास्तथाज्योतिषं व्याकर्णंचधनुर्धरं जलतरं वैद्यं तथा तंत्रकम् ॥ कोकंवाहनवाजिनोनटनृतंसद्बोधनाचातुरी विद्याश्चैवचतुर्दशप्रतिदिनं कुर्वंतुवोमंगलम् ॥ ५॥ शेषस्तक्षकशंखकालियमहापद्मास्तथा वासुकिःकर्कोऽनंतकपद्मसंज्ञकइतिख्याताश्चयेपन्नगाः ॥ अन्येकाननगह्वरेचजलधौयेचांतरिक्षेस्थितास्ते प्रातःस्मरणेननंदनवनेकुर्वंतुवोमंगलम् ॥ ६ ॥ शैलेंद्रोदशवेलबद्धशिलयः श्रीशैलसंख्यादयश्चंद्रद्रोणमहेंद्रमंदरगिरिश्रीकंठवासादयः ॥ सह्योदेवगिरिर्हिमश्चमलयोमैनाकक्रौंचौतथा सर्वेतेगिरयःसुमेरुसहिताःकुर्वन्तुवोमंगलम् ॥ ७ ॥ याकुंदेंदुतुषारहारधवलायाश्वेतवस्त्रावृता यावीणावरदंडमंडितकरायाश्वेतपद्मासना ॥ याब्रह्माच्युतशंकरप्रभृतिभिर्देवैःसदावंदिता सा मां पातुसरस्वती भगवती कुर्यात्सदामंगलम् ॥८॥ इति ॥ अथ जैनमंगलाष्टकम् ॥ श्रीमन्नम्रसुरासुरेंद्रमुकुटप्रद्योतिरत्नप्रभा भास्वत्पादनखेंदवःप्रवचनांभोधौव्यव

स्थायिनः ॥ येसर्वेजिनसिद्धसूरिमुनयोयेपाठकाःसाधवः स्तुत्यायोगिजनैश्चपं
चगुरवःकुर्वंतुवोमंगलम् ॥ १ ॥ सम्यग्दर्शनबोधवृत्तममलं रत्नत्रयं पावनं मुक्ति
श्रीनगरायणंजिनपतेः स्वर्गापवर्गप्रदम् ॥ धर्मंमुक्तिसुधात्रिचैत्रमखिलं जैना
लयंचालयंप्रोक्तंतत्त्रिविधंचतुर्विधमथोकुर्वंतुवोमंगलं ॥२॥ ये पंचौषधऋद्धयः
श्रुततपोवृद्धिंगताः पंच ये ये चाष्टागमहानिमित्तकुशलाश्चाष्टाविधाश्चारणाः ॥
पंचज्ञानधराश्चयेऽपिललितायेबृद्धिऋद्धीश्वराः सप्तैतेसकलाश्चतेगणभृतःकुर्वंतु
वोमंगलम् ॥ ३ ॥ नाभेयादिजिनाः प्रशस्तवदनाः ख्याताश्चतुर्विंशतिः श्रीमं
तोभरतेश्वरप्रभृतयोयेचक्रिणोद्वादश ॥ ये विष्णुप्रतिविष्णुलांगलधराः सप्ताधि
काविंशतिस्त्रैलोक्याभयदास्त्रिषष्टिपुरुषाः कुर्वंतुवोमंगलम् ॥ ४ ॥ कैलासेवृषभ
स्यनिर्वृतिरथो वीरस्यपावापुरे चंपायांवसुपूज्यसज्जिनपतेःसंमेदशैलेऽर्हताम् ॥
शेषाणामपिचोर्जयंतशिखरेनेमीश्वरस्यार्हतोनिर्वाणाऽवनयःप्रसिद्धमहिमाः कु

वंतुवोमंगलम् ॥ ५ ॥ देव्यश्चाष्टजयादिकाद्विगुणिताविद्यादिकादेवताः श्रीती
र्थेश्वरमानकाश्चजनकायक्षाश्चयक्षेश्वराः ॥ द्वात्रिंशत्त्रिदशाग्रहास्तिथिसुरादि
क्कन्यकाश्चाष्टधादिक्पाला दशचेत्यमीसुरगणाः कुर्वंतुवोमंगलम् ॥ ६ ॥ योग
र्भावतरोऽर्हतोजययुतीजन्माभिषेकोत्सवे योजातःपरिविक्रमेचविदितोयः केवल
ज्ञानभाक् ॥ यःकैवल्यपुरःप्रवेशमहिमा संभावितः स्वर्गिभिः कल्याणानिचता
निपञ्चसततं कुर्वंतुवोमंगलम् ॥ ७ ॥ इत्थंश्रीजिनमंगलाष्टकमिदंकल्याणकाले
ऽर्हतांपूर्वाह्णेसुमहोत्सवेऽपिसततं श्रीसर्वसौख्यास्पदं ॥ येश्शृण्वंतिपठंतितैश्चम
नुजैर्धर्मार्थकामान्वितैर्लक्ष्मीराश्रयतेव्यपायरहिताकुर्वंतुवोमंगलम् ॥ ८ ॥ इति
श्रीकृष्णार्पणमस्तु ॥ शुभंभवतु ॥ ॥ ॥ ॥

श्रीगणेशाय नमः ॥ ॥ अथचतुर्थीकर्म ॥ चतुर्थ्यांअपररात्रे (विवाहवासरमारभ्यचतुर्थवासरे ॥ अपर
रात्रे-रात्रेःपश्चिमयामे) वरोवध्वासहमंगलंस्नात्वाअहतवाससीपरिधायतिलकंकृत्वा यथाविधिआसनेउपवि
श्यगृहाभ्यंतरेवेदिंविधायआचम्यप्राणानायम्य अद्य०पूर्वोच्चारितएवमादिग्रहगुणविशेषेणविशिष्टायांशुभपु
ण्यतिथौममअस्याःपत्न्याःभार्यात्वसिध्यर्थंचतुर्थीकर्मकरिष्ये ॥ तदंगत्वेनकलशाराधनपूर्वकं गणपतिपूजनंब्र
ह्मादिवरणंदिग्रक्षणंपंचगव्यकरणंभूमिपूजनंअग्निस्थापनंचकरिष्ये ॥ यथाशक्तिपंचभूसंस्कारांतंकर्मकृत्वा
अभ्यंतरतोग्निमुपसमाधायदक्षिणतोब्रह्माणमुपवेश्योत्तरतउदपात्रंप्रतिष्ठाप्यस्थालीपाकंश्रपयित्वाज्याविष्टा
हुतीर्जुहोतिब्रह्मणान्वारब्धे ॥ ॐप्रजापतयेस्वाहा ॥ इदंप्रजापतयेनमम ॥ प्रोक्षण्यांत्यागः ॥ ॐइंद्राय
स्वाहा इदमिन्द्रायनमम ॥ ॐअग्नयेस्वाहा इदमग्नयेनमम ॥ ॐसोमायस्वाहा इदंसोमायनमम ॥ (अन्वारं
भंविना) (अभ्यंतरतइत्यारभ्यजुहोतीत्यंतंसूत्रं ॥ अभ्यंतरतःगृहस्याभ्यंतरे ॥ अग्निं-वैवाहिकाग्निं ॥ उप
समाधायपंचभूसंस्कारपूर्वकंस्थापयित्वा ॥ दक्षिणतः-अग्नेर्दक्षिणस्यांदिशिब्रह्मासनमास्तीर्यतत्रयथाविधिब्रह्मा
णमुपवेश्य ॥ उत्तरतः-प्रणीतासनादुत्तरस्यांदिशि ॥ उदपात्रं-शुद्धोदकपूरितंनवंताम्रादिपात्रंप्रतिष्ठाप्यस्था
पयित्वा ॥ अयमेवोदपात्रप्रतिष्ठावसरोब्रह्माणमुपवेश्येतिपुनरुपादानात् ॥ स्थालीपाकं-चरुंयथाविधिश्रपयि
त्वा ॥ आज्याविष्टा—आघारहोमांतरंआज्यभागौहुत्वा ॥ अत्रानुक्तमपिप्रणीताप्रणयनादिनाआघारहोमांतं
कर्मोह्यं ॥ एषएवविधिरितिनियमात् ॥ आहुतीर्जुहोति-अग्नेप्रायश्चित्तइत्यादिपंचभिर्मंत्रैःपंचाज्याहुतीर्जुहुया

त्)ॐअग्नेप्रायश्चित्तेत्वंदेवानांप्रायश्चित्तिरसिब्राह्मणस्त्वानाथकामउपधावामियास्यपतिघ्नीतनूस्तामस्यैनाशय
स्वाहा ॥ इदमग्नयेनमम ॥ १ ॥ (स्थापितोदपात्रेषडाहुतीनांसंस्रवप्रक्षेपः) ॐवायोप्रायश्चित्तेत्वंदेवानांप्रा
यश्चित्तिरसिब्राह्मणस्त्वानाथकामउपधावामियास्यैप्रजाघ्नीतनूस्तामस्यैनाशयस्वाहा ॥ इदंवायवेनमम ॥ २ ॥
ॐसूर्यप्रायश्चित्तेत्वंदेवानांप्रायश्चित्तिरसिब्राह्मणस्त्वानाथकामउपधावामियास्यैपशुघ्नीतनूस्तामस्यैनाशयस्वा
हा ॥ इदंसूर्यायनमम ॥ ॐचंद्रप्रायश्चित्तेत्वंदेवानांप्रायश्चित्तिरसिब्राह्मणस्त्वानाथकामउपधावामियास्यैगृह
घ्नीतनूस्तामस्यैनाशयस्वाहा ॥ इदंचंद्रमसेनमम ॥ ४ ॥ ॐगंधर्वप्रायश्चित्तेत्वंदेवानांप्रायश्चित्तिरसिब्राह्मण
स्त्वानाथकामउपधावामियास्यैयशोघ्नीतनूस्तामस्यैनाशयस्वाहा ॥ इदंगंधर्वायनमम ॥ स्थालीपाकस्यजुहो
ति ॥ ॐप्रजापतयेस्वाहा ॥ इदंप्रजापतयेनमम ॥ ब्रह्मणान्वारब्धेआज्यस्थालीपाकाभ्यांस्विष्टकृद्धोमः ॥
ॐअग्नयेस्विष्टकृतेस्वाहाइदमग्नयेस्विष्टकृतेनमम ॥ (प्रोक्षण्यांसंस्रवप्रक्षेपः ॥) आज्येननवाहुतयः ॥ ॐभूः
स्वाहा इदमग्नयेनमम ॥ १ ॥ ॐभुवःस्वाहाइदंवायवे० ॥ २ ॥ ॐस्वःस्वाहाइदंसूर्याय० ॥ ३ ॥ ॐत्वन्नो
अग्नेवरुणस्यविद्वान्देवस्यहेडोअवयासिसीष्ठाः ॥ यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्यस्मत्
स्वाहा ॥ इदमग्नीवरुणाभ्यांनमम ॥ ४ ॥ ॐसत्वन्नोअग्नेवमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ ॥ अवय
क्ष्वनोवरुणंरराणोवीहिमृडीकंसुहवोनएधिस्वाहा ॥ इदमग्नीवरुणाभ्यांनमम ॥ ५ ॥ ॐ अयाश्चाग्नेस्यन
भिशस्तिपाश्चसत्त्यमित्वमयाऽअसि ॥ अयानोयज्ञंवहास्ययानोधेहिभेषजंस्वाहा ॥ इदमग्नयेअयसे नमम

॥ ६ ॥ ॐयेतेशतंवरुणयेसहस्रंयज्ञियाःपाशाविततामहांतः ॥ तेभिर्नोऽअद्यसवितोतविष्णुर्विश्वेमुंचंतुमरुतः
स्वर्क्काःस्वाहा ॥ इदंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्केभ्यश्चनमम ॥ ७ ॥ ॐ उदुत्तमंवरुण
पाशमस्मदवाधमंविमध्यमꣳश्रथाय ॥ अथावयमादित्यव्रतेतवानागसोऽअदितयेस्यामस्वाहा ॥ इदंवरुणा
यादित्यायादितयेचनमम ॥ ८ ॥ ॐप्रजापतयेस्वाहाइदंप्रजापतयेनमम ॥ ९ ॥ ततःसंस्रवान्प्राश्यआचमनं
कृत्वावरयोरन्यतरेणपूर्णपात्रंब्रह्मणेदत्वाब्रह्मग्रंथिविमोकःकार्यः ॥ पवित्राभ्यांप्रणीताजलेनशिरसिमार्जनं ॥
ॐ सुमित्रियानऽआपओषधयःसंतुइति ॐ दुर्मित्रियास्तस्मैसंतुयोऽस्मान्द्वेष्टियंचवयंद्विष्मःइतीशानेप्रणीतां
न्युब्जीकुर्यात् ॥ततआस्तरणक्रमेणबर्हिरुत्थाप्यघृताक्तंकृत्वाजुहुयात् ॥ ॐदेवागातुविदोगातुंवित्वागातुमित॥
मनसस्पतइमंदेवयज्ञꣳस्वाहावातेधाः ॥ हुत्वाहुत्वैतासामाहुतीनामुदपात्रेसꣳस्रवान्समवनीयकेषांचिन्मतेस्वि
ष्टकृदाहुतेरपिततएनांमूर्द्धन्यभिषिंचति ॥ ॐ यातेपतिघ्नीप्रजाघ्नीपशुघ्नीगृहघ्नीयशोघ्नीनिन्दितातनूर्जारघ्नीत
तएनांकरोमिसाजीवत्वंमयासहामुकदेवि ॥ अथैनांस्थालीपाकंप्राशयति (अथमूर्द्धाभिषेकानंतरंएनांवधूंस्था
लीपाकंचरुशेषंप्राशयति ॥ साचप्राश्नातितत्रवरोमंत्रंपठतिप्राणैस्तेति ॥) स्वयंचाचारात्तयासहप्राश्नाति ॥
विवाहेस्त्रियासहभोजनेनदोषःतदुक्तंहेमाद्रौ—प्रायश्चित्तकांडेगालवेन—विवाहकालेयात्रायांपथिचौरसमाकु
ले ॥ असहायोभवेद्विप्रस्तदाकार्यंद्विजातिभिः ॥ एकयानसमारोहएकपात्रेचभोजनं ॥ विवाहेपथियात्रायांकृ
त्वाविप्रोनदोषभाक् ॥ अन्यथादोषमाप्नोतिपश्चाच्चांद्रायणंचरेत् ॥ इति ॥ ॐ प्राणैस्तेप्राणान्संदधाम्यस्थिभिर